



~~#3939~~

F-138

Complete

(8)

सं. १५८६ [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

सं. १३५२ [illegible]

श्या॰
१

ॐ श्रीगणेशाय नमः ॐ नमः परदेवता
यै ॐ देवीदानवदैत्यदर्पनिवहात्युन्मूल
यंतीं शिवाम् ब्रह्मानन्दमहेशमौलि
मणिभिः संसेविताङ्घ्रिद्वयाम् नत्वाश्री
गुरुपादपद्मयुगलं मोदामृतप्लावितः पू
र्णानन्दगिरिर्मनोतिविरलां श्यामार
हस्याभिधाम् स्वतंत्रं वीरतंत्रं च तंत्रफे
त्कारिणी तथा कालिकाकुलसर्वस्व
कालीतंत्रं च यामलम् कुलचूडामणिं
चैव कुमारीतंत्रमेव च कुलार्णवं तथा
कालीकुलभैरवतंत्रकम् कालिकाकु
लसद्भावं तथा चोत्तरतंत्रकम् गुरुणां
च मतं नानासाधकानां तथा मतम्
शुद्धबुद्धिस्वभावार्थं वक्ष्यामि मोदका
रिणीम् तदुक्तं स्वतंत्रे क्रोधीशं बिन्दु
युक्तं कान्ते त्रिमूर्त्यग्निसमायुतम् त्रिलि
खित्वा परतो देवि कूँकारद्वयमेव च मा
याद्वयं समालिख्य त्रिसंवर्णसमन्वयु
क्तं कालिके समवर्णेन पूर्ववत्पर
मेश्वरि स्वाहान्तेयं महाविद्या द्वाविंश

सहशापरा अनया सदृशी विद्या नास्तिज्ञा
नेत मामके कुमारीतन्त्रेऽपि भैरव उवाच
अतिगुह्यतरं देवि तत्त्वानात्मकं सनातनम्
अतीव चरहोगोप्यं च कथितं ते वशाकाते
अतीव च प्रियासीति कथयामि तव प्रिये
रूपाणि च बहूनि असंख्यानि प्रकृतेः सन्ति भावि
नि तेषां मध्ये महेशानि कालीरूपं मनोह
रम् विशेषतः कलियुगे नराणां भुक्तिमु
क्तिदम् तस्मात्तु पातकाश्चैव ब्रह्मविष्णु
शिवादयः चन्द्रः सूर्यश्च वरुणः कुबेरो
ऽग्निस्तथापरः दुर्वासाश्च वशिष्ठश्च दत्तात्रे
यो बृहस्पतिः बहुनात्र किमिहोक्तेन सर्वे
देव उपासकाः कालिकायाः प्रसादेन भु
क्तिमुक्तिः करे स्थिता तस्या मन्त्र प्रवक्ष्या
मि यतो रत्नेषु गत्रयम् ककारं वह्निसंयु
क्तं रतिबिन्दुसमन्वितम् त्रिगुणं च ततः
कूर्चयुग्मं लज्जायुगं तथा दक्षिणे कालि
के चेति पूर्वबीजानि वेष्टयेत् वह्निजाया
वधिः प्रोक्तः कालिकाया मनुर्मतः नस
सिद्धाद्यपेक्षास्ति नारीमित्रादिदूषणम्

पृपा·
२·
२

श्रुतिरपि अथैदेनां ब्रह्मरंध्रे ब्रह्मस्वरूपि
णीमाप्नोति सुभगां त्रिगुणां शुक्लां कामरेके
न्दिराबिन्दुमेलनरूपा एतत्त्रिगुणितामादौ
तदनु कूर्च्चद्वयं कूर्च्चबीजञ्च ओमसहस्व
रबिन्दुमेलनरूपम् तदेव द्विरुच्चार्य्य भुव
नेशद्वयम् भुवनात्मओमसज्वलनेन्दिराश्रु·
समेलनरूपा तदुक्तं दक्षिणाकालिके
तवाभिमुखता तदनु बीजसप्तकमुच्चा
र्य्य रूपद्वयं तु जायासमुच्चारेत् मत्वा शिवम·
यो भवेत् सर्वसिद्धीश्वरो भवेत् गतिस्त
स्यास्ति नान्यस्य मत्तो नारीश्वरः सत्यं सर्वे
श्वर इति भैरव उवाच नात्र चिन्ता विशुद्धि
र्व्वा नारिमित्रादिदूषणम् न वात्र यासवा
ऽल्पसमयासमयादिकम् देवैर्देवत्व·
विषये सिद्धैः खेचरसिद्धये पन्नगैरात्मसे
वे मैथुनिभिश्च मुमुक्षुभिः कामिभिर्द्धि·
र्मिष्ठार्थिलिप्सुभिः सेवितां पराम् नचि·
तसमयवाऽल्पकायक्लेशकारं नच यत्र
यच्चिन्तयेन्मन्त्री सर्वसिद्धिसमृद्धिदाम् तस्य
हस्तस्थैवास्ति सर्वसिद्धिर्न संशयः गद्य

पद्यमयीवाणीसभायांतस्यजायते तस्य
दर्शनमात्रेणवादिनोनिष्प्रभागताः राज्ञा
नोःपिचदासत्वंभजंतेकिंपरेजनाः वह्नेः
शैत्यंजलस्तंभंगतिस्तंभंविवस्वतः दिवा
रात्रिव्यत्ययंचैववशीकर्तुंक्षमोभवेत् सर्व
स्यैवजनस्यैववल्लभःकीर्तिवर्द्धनः स्वते
वभजंतेदेवगणास्तंतुलेभंगैरैः वंद्यस्त्र
र्व्यसमोभूत्वावसेत्कल्पायुतंदिवि नः
नस्यतुलेभंकिंचिद्द्वयःस्मरेद्घोरदक्षि-
णाम् । अथास्याःसपर्याविधिर्लि-
ख्यते ॐब्राह्मेमुहूर्तेउत्थायबद्धपद्मा
सनःशिरःस्थायोस्तुविशुद्धवर्णसह-
स्रदलकमलकर्णिकास्थशशांकेनश
रदिंदुसुन्दरचन्द्रमण्डलांतर्गतंहंसपी
ठेनिजगुरुंध्यायेत् यथा शुद्धस्फटिक
संकाशंशुद्धक्षौमविराजितम् गंधानु
लेपनंशांतंवराभयकरांबुजम् मन्द
स्मितंनिजगुरुंकारुण्येनावलोकनम्
वामोरुशक्तिसंयुक्तंशुक्लाभरणभूषि
तम् स्वशास्त्रादर्शहस्तेनयुक्तंचारुकले

वरम वामेथ तोत्पलाद्याः स्मरक्तकायाः स्म
शोभनम् परानन्दरसोल्लासलोचनहृदयपं
कजम् इति ध्यात्वादिव्याभिषेकेन गुरूणां
संप्रदायानुगतकृतनामपूर्वकं मानसो।
ह्पचारैराराध्य ऐं ह्रीं श्रीं ह्सक्षफ्रें ह्सक्ष
मलवरयूं ह्सक्षफें श्री अमुकानन्दनाथा
य श्री अमुकादेव्या श्री गुरुपादुकां पूजया
मि इति गुरुपादुकां नत्वा जपसमर्पणं कृ
त्वा प्रणमेत् यथा अज्ञानतिमिरान्धस्य ज्ञा
नांजनशलाकया चक्षुरुन्मीलितं येन
तस्मै श्री गुरवे नमः ॥
अथ सारदाटीकाकार श्री राघवभट्टम
तेन शक्तिविषयेऽस्यक्रमेवेति निश्चित
वचनं तु यदर्शनात् तद्यथा श्वेतांबरय
रोगौरं श्वेताभरणभूषितम् अपि च रक्त
माल्यांबरधरं रक्तकंपद्मविलसत्करम् इति
त्रसमीचीनं श्वेतवर्णगुरोर्ध्यानान्तरं
भवति शाक्तविषये तत्तथादर्शनात्
यथा ज्ञानार्णवे ब्रह्मरन्ध्रे सहस्रारेक
र्णिकायां वलोगुरुः तस्मात् संप्रदायानुग

गमागुरोर्ध्यानं कुर्य्यादिति शेषः अथ गुरो
राज्ञां गृहीत्वा मूलाधारपद्मकर्णिकास्था
त्रिकोणान्तर्गतस्वयंभूलिङ्गवेष्टिनी प्रसु
प्तभुजगाकारा सार्द्धत्रिवलया विद्युत्पु
ञ्जप्रभा नीवारशूकतन्वी कुलकुण्डलिनी
इष्टदेवतास्वरूपा कुकारेणाहंस इति मन्त्रा
नावधेवनदहनयोगात् सचैतन्या विद्या
यब्रह्मवर्त्मना परमशिवे नीत्वा तयोः सा
मावेशं प्रविष्टा चन्द्रमण्डले कुलगुरुन्
ध्यायेत् तदुक्तं कालिकासूत्रे मूला
धारस्थे हृद्धि त्रिकोणान्ते जसां निधिम्
तस्याग्निशिखामानीय त्रयः ऊर्द्ध्वमवस्थि
ताम् नीलतोयदमध्यस्थतडिल्लेखेव
भास्वराम् नीवारशूकतन्वी वत्पीता
भास्करोपमाम् तस्याः शिखाया मध्ये च
परमोर्द्ध ह्यवस्थिताम् स ब्रह्मा स हरिः
शानः स शिवः परमस्वराट् स एव विष्णुः
स प्राणः स कालाग्निः स चन्द्रमाः इति कु
लकुण्डलिनीं ध्यात्वा सर्वपापैः प्रमुच्य
ते स महापातकेभ्यश्च मुक्तो भवति स

प्रण. २. ४

वेत्ति हि कुलाभैरवो भवतीति ॥
अथ कुलगुरून् यथा कुलचूडामणौ मः
लादिवल्लरस्यांते गुणं ध्यात्वा गुरुं स्मरेत
प्रह्लादानन्दनाथाख्यं खेवशिष्टानन्दनाथ
कं क्रोधानन्दसंखोनन्दौध्याननानंदततः
पं बोधानंदनं तत्रैव ध्यायेत कुलसु-
खोपरि महारसरसोल्लासमदयाघूर्ण
लोचनाः कुलालिंगनसंभिन्नापूर्णिता
शेषमानसाः कुलशिष्टैः परिवृताः श्रोणि
तःकरणाश्रिताः वराभययुताः सर्वकु-
लंतत्वार्थवादिनः एवं कुलगुरून्ध्यात्वा वि
सृज्य कुलमाल्यकं कुलस्थानेषु मानी
स्नानार्थं तीर्थमाश्रयेत शाक्तं कुलगुरु
वत् यत्स्तं कुलसंखावहम् रहस्यम
मृतं प्रोक्तं गोमांसपञ्चशाकटे कुलनाथ
परमस्यैव शाक्ताः परसेविनः तेषां शि
ष्याच यागस्य अभिचाराय कल्पते तस्मा
त् सर्वप्रयत्नेन कुलीनं गुरुमाश्रयेत्
कुलीनः सर्वविद्यानामधिकारीति गीय
ते दीक्षागुरुः सएवात्मा सर्वमंत्रस्य नाय

रः अयमञ्जकृतो प्रकाशमानां प्रथमे प्रा
णायामे प्रतिप्रयाणे ऽथ मत्तायमानाम्
अंतःपद्मासने संचरंतीमानन्दरूपाम
बलां प्रपद्ये इति अहं देवी न चान्योऽस्मि
ब्रह्मैवाहं न शोकभाक् सच्चिदानन्दरू
पोऽहमात्मानमिति भावयेत् प्रातःकृ
समवश्यमेव नित्यं करणीयं प्रातःकृ
त्यमकृत्वा तयोर्देवीभक्तितोऽर्चयेत्
तस्य पूजा च विफला शौचहीना यथा
क्रिया ॥ अथ नद्यादौ गत्वा
कालिकारूपं सर्वं विभाव्य स्ववर्णे जन
नात्मकं कुलगर्भमनामातर्जनीषु
धृत्वा आचम्य मूलं स्मरन् मलापक
र्षकं कृत्वा आचम्य ॐ अद्येत्यादि कुल
देवताप्रीतिकामोऽमुत्र स्नानमहं करि
ष्ये इति संकल्प्य जले त्रिकोणचक्रं कृ
त्वा सूर्यमंडलात् कुशमुद्रया तीर्थ
मावाह्य मूलान्ते ॐ आत्मतत्त्वाय स्वा
हा विद्यातत्त्वाय स्वाहा ॐ शिवतत्त्वा
य स्वाहा इति त्रिराचामेत् अथवा ॐ

पृपा. १० ५

ह्रीं ह्रां ह्रः इत्यनेन त्रिराचम्यात्मानं त्रिः
संप्रोक्ष्य मूलेन मृत्तिकया अंगलेपनं
कृत्वा मूलं पठन् कुंभमुद्रया स्वमूर्द्ध्नि
त्रिर्जलमभिषिच्याञ्जलीभिः श्रवणा
दीनि सप्तच्छिद्राणि संवृत्य त्रिर्निमज्जे
त ततः क्रं कुमारीतन्त्रे वेदाद्यं च तथा
मायास्वाहेत्याचामनमतं नीलतंत्रेऽ
पि सतः कुशानपि संगृह्य स्नात्वा जला
न्तिकं ततः मलापकर्षकं कृत्वा मंत्र
स्नानं समाचरेत् विद्यया त्रिर्निमज्ज्यैव
आचामेत् पश्चात्पुनः कुलचूडामणौ
कृत्स्नरक्षेद्धरिं नीलाविद्यया समं मृत्ति
यः तत्र यः कुलशिष्यश्च संततं परा
मृशान् दिवसश्चीमथ्यार्द्धचणतालभू
तसंभवाम आचांतः कुलधर्मेण सद
र्मः कुलपुत्रकः कुलपात्रे सहृद्बोच
सतिलं सजलं ततः गृहीत्वा कुलदेव
स्य प्रीतये स्नानमाचरेत् कृतसंकल्प
पवादौ कुलचक्रे जले प्रसेत् जलस्था
नात् समानीय कुलमुद्रां कुशेन च कु

लतीर्थानि तत्रैव समावाह्य शिवात्मकं
तत्तोयं च त्रिधा पीत्वा त्रिधा च प्रोक्षणं मनोः
अथांकुशमुद्रा यथा ज्ञानार्णवे दक्षमु
ष्टिं विधायाथ तर्जनीं कुंचयेत्प्रिये अंकु
शाख्या महामुद्रा त्रैलोक्याकर्षणे क्षमा
तीर्थावाहनमंत्रो यथा श्रीक्रमसंहिता
याम् गंगे च यमुने चैव गोदावरि सर
स्वति नर्मदे सिन्धु कावेरि जलेऽस्मिन्
सन्निधिं कुरु अथ स्वतंत्रेऽपि मूलपठ
नमूर्द्धार्णतोयं मुद्रया कुंभसंज्ञया दि
क्षाकारत्रयं देवि श्रावामेतत्साधकाग्र·
णीः आत्मविद्याशिवैस्तत्वैस्ततोया
गहृदं विशेत् कुंभमुद्रा यथा ज्ञानार्ण
वे दक्षांगुष्ठं परांगुष्ठे क्षिप्त्वा हस्तद्वयेन
तु सावकाशं चैव मुष्टिं कुंभमुद्रां विदु
र्बुधाः सप्तच्छिद्राणि संरुध्य ततो मन्त्र
त्रियास्सुधीः आत्मविद्याशिवैस्तत्वैश्रा·
वामेतत्साधकाग्रणीः वह्निजायां ततो
दत्वा शुद्धेन पयसा प्रिये ओं मानधनिव
जिनि महाप्रतिपारे रक्ष रक्ष हूं फट् स्वा·

प्रपा.
र.
६

ह्रा इति शिखाबन्धनम् मूलेन तिलकं कृ-
त्वा पूर्ववदाचम्य वैदिकीं सन्ध्यां कुर्य्यात
तदुक्तं कुमारीकल्पे प्रणवपूर्वमुद्धृत्य
मान्तां ते च ध्वनीति च वज्रिणीतिपदं श्लोके
महाप्रतिष्ठारे तथा ह्रदन्त्रं यं हूं फट् स्वाहा
इति च तदनन्तरं अनेनैव च मन्त्रेण रक्षां कु-
र्य्याद्विचक्षणः रक्षामिति शिखाबन्धन
रूपेणैव स्याच्चले ग्रन्थिबन्धनरूपेन वा कु-
र्य्यादित्यर्थः सारदाटीकायां च उक्तेनै-
व विधानेन कृत्वा स्नानं च तान्त्रिकम् वै-
दिकीं तान्त्रिकीं सन्ध्यां कृत्वा तर्पमचरित
तान्त्रिकीं सन्ध्यां यथा तदुक्तं तत्रैव प्रन
णवस्य विन्यस्य षडङ्गमपि मन्त्रवित् वा
मद्धस्ते जलं गृह्य गलितोदकबिन्दुभिः
सप्तधा प्रोक्षणं कृत्वा मूर्द्धि मन्त्रमनु
स्मरन् अवशिष्टोदकं दक्षहस्ते संगृह्य
बुद्धिमान् इडया कृष्णदेहान्तः क्षालित
पापसंचयं कृष्णवर्णं तदुदकं दक्षनासा
विवेचयेत् दक्षहस्ते च तन्मन्त्री पापरूप
विचिन्त्य च पुरतो वज्रपाषाणे प्रक्षिपेद्

स्त्रं मन्त्रतः अमन्त्रापि षडंगन्यासं समाच
र्य वामहस्ते जलं ततः गृहीत्वा दक्षिणे
चैव संपुटकारयेत्ततः शिववायुजलपृ
थ्वीवह्निबीजैस्त्रिधापुनः अभिमंत्र्य च
मूलेन सप्तधा तत्र अंगुष्ठया निक्षिपेज्ज
लं मूर्ध्नि शेषं दक्षिणे विधायच शरीरं ततः
स्थितं पापं क्षालयेत्साधकाग्रणीः ।
अथ प्रयोगः पूर्ववदाचम्य षडङ्गन्यासं
कृत्वा वामहस्ते जलं निधाय दक्षहस्ते
नाच्छाद्य हं यं वं लं रं इति त्रिरभिमंत्र्य मू
लपुष्करनगलितोदकबिन्दुभिः तत्वमु
द्रया मूर्ध्नि सप्तधा अभ्युक्षणं कृत्वा शेषं
जलं दक्षहस्ते समादाय तेजोरूपं ध्यात्वा
इडया कृष्णदेहान्तः पापं प्रक्षाल्य कृष्णव
र्णं तज्जलं पापरूपं ध्यात्वा पिङ्गलया विरि
च्य पुरः कल्पितवज्रशिलायां फडिति प्रक्षि
पेत् इति तान्त्रिकी संध्या ततः हस्तौ प्रक्षा
ल्याचम्य जले यंत्रं ध्यात्वा सावरणां देव
तामावाह्य पेशाने ऐं श्रीं अमुकानन्दना
थ भैरव तर्पयामि इति देवतीर्थेन त्रिः स

पृपा· १· ७

कुह्वागुह्वादकेनं संतर्प्य वह्नौ परमगुरुं
नैऋत्यां परापरगुरुं वायव्यां परमेष्ठिगुरुं
सर्वैवतं संतर्प्य मध्ये श्रीगुरुदेवताः
तृप्यंतामिति यथाशक्तितः संतर्प्य प
कैकांजलिना परिवारान् संतर्पयेत् अ
शक्तश्चेत् मूलमंत्रेण सायुध सपरि
वार सवाहन महाकालसहितः श्रीद
क्षिणकालिकामाता तृप्यतामिति त्रिः
संतथावाऽष्टानां भैरवाणां सकलैका
कविधिना स्वपित्रादीनपि संतर्प्य उर्वी
द्वतरक्तपुष्पादिनार्घ्यं कृत्वा ह्रीं हंसः मा
र्त्तंडभैरवाय प्रकाशशक्तिसहिताय इद
मर्घ्यं स्वाहा इति सूर्यायत्रिरर्घ्यं संप्रस्था
यदत्वा सूर्यमंडले देवीं ध्यात्वा उर्वीद्रत
बिल्वपत्रजवापुष्पादिनार्घ्यं कृत्वा देवी
गायत्रीमंत्रेण महाकालसहितायै श्री
दक्षिणकालिकायै इदमर्घ्यं स्वाहा इत्य
र्घ्यं दत्त्वा गायत्रीं यथाशक्तितः प्रजप्य दे
व्यै समर्पयेत् ततःक्रम तर्पणोद्दिष्टं गु
जीततृप्यंतां महाकालभैरवः पिता मू

ल्लोतेन तर्पयामीति स्वाहान्तं तर्पणमतः प
र्वविधं तर्पणं नेत कृत्वा पापहरो भवेत् कु
लचूडामणौ च भैरवाय च देवाय भैरवेण
चकरेण भैरवाख्यप्रदानं पश्चमंत्रमुद्रा
ख्यपूर्वंतः द्वारदानं गृहीत्वा ततो लि
गानुरूपतः भैरवी भैरवात्मानं भावये
द्यदृशाघतः श्राद्धे विवाहदाने वस्त्रा
नैर्नागपत्रपूजने एवं चिंतापरो देवः प्रसीद
ति न संशयः अमच एवमेवविधानेन
यथाशक्तिच तर्पयेत् मार्त्तंडभैरवाय·
ति त्रिरर्घ्यं कल्पयेत्ततः कुलचूडामणौ
च कुलमूर्ध्याय देवाय त्रिरर्घ्यं च प्रक
ल्प्य च देवीपितन्त्रपींश्चेव तर्पयेत् कु
लवारिणा नन्दिकेश्वरसंहितायां च
यावन्न दीयते चार्घ्यं भास्कराय निवेद
नम् तावन्न पूजयेद्विष्णुं शंकरं वा सु
रेश्वरीम् दिनेशाय च चातिष्ठन्वारि·
णाञ्जलित्रयम् अष्टोत्तरशतावृत्त्या
गायत्रीं प्रजपेत् सुधीः कालिकायेप
देशात्क्वाविस्मरेत्तदनंतरम् श्मशान·

पुपा.
१.
८

8

वास्मिंश्चैरु. नंतार्थीमहीतितत्तेनावदेत् तन्ना
म्नोरेपदंश्रोत्रपञ्चोदयात्पठेदिति अस्याः
प्रभावमात्रेण महापातककोटयः सद्यः प्र
लयमायान्ति साधकस्य चनान्यथा रावण
स्य वधाद्वैव रामचन्द्रो विमोचितः गुरुदा
राकर्षणाच्चैव देवश्चन्द्रो विमोचितः मातुः
वधात्परशुरामो मोचितोऽस्याः प्रसादतः
सुरापानाच्च श्रीकृष्णोऽटनात्रेयस्तथैव च
एवमेषा महाविद्या गोमध्याच्चैव हन्ति
महापातकयुक्तोऽपि यो जपेद्दशधा यदि
सर्वसत्त्वमहादेवि मुक्तो भवति तत्क्षण
त् अथ कुलवृक्षमणीच उत्पाद्य कुल
वृक्षे द्वेपरिपायकुलेन तत् तिलकं कु
लक्षं पंचकृत्वाचम्य कुलेश्वरः स्वतंत्रेऽपि
मातार्थेरकवस्त्रेण भोगार्थी क्षेत्रवास
सा मारणे कुलवस्त्रं च वशे परकं सदा स्त्र
ही उच्चाटे व्याघ्रचर्माणि दृढ त्वक् स
भकर्माणि परिधाय ततो मन्त्री यागभू
मिमध्ये विशेत् तदन्तरे च ततश्च सा
धकश्रेष्ठो हृदि मंत्रपरामृशात् अवहि

मौनसोपोषीयागभूमिमथो विशेत् ज
लं एवं कारे कृत्वा गत्वाहारिमद्रेष्ठरि हा
लये हृल्लपादौ वव स्त्रमाणेन वर्त्मना या
गस्थानानि यथा फेत्कारिणीमत एक
लिंगे श्मशाने वा शून्यागारे चतुष्पथे ।
तत्रस्थसा यथेष्टो गीविद्यात्रिभुवनेश्व
रीम् पंचकोशांतरे यत्र न लिंगान्तरं
मीहते नदेकलिंगमाख्यातं तत्र सिद्धि
रुत्तमा श्मशानमालांते च नदीतीरे
विल्वमूले श्मशाने शून्यवेश्मनि एक
लिंगे पर्वते वा देवागारे चतुष्पथे शिव
स्योपरि भुवने च जले वा कंटकएपिते स
ग्रामभूमौ यानौ वा स्थले वा विजने वने
यत्र ऊवस्थले स्मिन् यत्र वा स्यात् मनोल
ये उच्चटपर्वते वापि निर्जले वा चतुष्प
थे देवागारे देवभूमौ विल्वमूले नदीत
टे स्वगृहे निर्जनारामे तथा चाश्वत्थसं
निधौ श्रेष्ठे तेषामेकतमं स्थानमाश्रि
सयत्नतः ॐ वज्रोदके हूं फट् स्वाहा अ
नेन जलं सप्तधानानीयासनम् भूतोप

समुपविश्य ॐ ह्रीं विष्णुहृत्सर्वपापानि मम पा
शेषविकल्पमपनय हुं फट् स्वाहा इति पा
त्रग्रहाल्य स्पृष्ट्वा द्विराचामेत तदुक्तं क्रमा
दीकल्पे ॐ वज्रोदके हुं फट् स्वाहा मंत्रेण
मंत्रवित् जलमानीयमध्येनत्वासनं शो
धयेत्ततः प्रणवं सर्वं बहूमललन्तावीजं त·
थैवच ततो विष्णुर्हृते सर्वपापानि शम
येदथ अशेषांते विकल्पस्यात अपनेय
ति ततः परम् कूर्चबीजं भवेन्मंत्रपादप्र
क्षालने प्रिये अथवासत्रिकोणभूवृत्त·
भूविंबविलिख्याधारशक्तयेनमः इति
संपूज्य तदुपरि अस्त्रमंत्रेण शोधितं सा
धारपात्रं निधाय नमः इति संपूज्य अंकु
शमुद्रया सूर्यमण्डलात्तीर्थमावाह्य
ॐ इति गंधपुष्पं दत्वा धेनुमुद्रां प्रदर्श्य ॐ
इति दशधाजप्त्वा तज्जलेन गृहद्वारमभ्य
क्ष्य द्वारदेवताः प्रपूजयेत् तदुक्तं तंत्रांत
रे ततः आचमनं कृत्वा सामान्यार्घ्यं प्रक
ल्पयेत् त्रिकोणवृत्तभूविंबमण्डलं रच
येत्तस्योः आधारशक्तिं संपूज्य तत्रा।

यांश्चविनिक्षिपेत् अस्त्रमंत्रेणसंशोध्यहृ
न्मंत्रेणप्रपूरयेत् निक्षिपेत्तीर्थमावाह्य
ंगयादीन्प्रणवेनतु दर्शयेद्धेनुमुद्रांवै
सामान्यार्घ्यमिदंस्मृतम् सामान्यार्घ्येण
देवेशिपूजयेद्द्वारपार्श्वयोः यन्मुद्रा
यथा अस्त्रेणाभिमुखंविक्षिप्ताकनिष्ठाना
मिकापुनः तथाचतर्जनीमध्यायेन
मुद्रामनप्रदर्शनाद्वारदेवतायथा गणेश
क्षेत्रपालंचवटुकंयोगिनींतथा ऊर्द्ध्ववा
मेवदक्षेच अधश्चैवप्रकीर्त्तितम् अथ
पूजा द्वारोर्द्ध्वंगंगणेशंवामेक्षांक्षेत्रप
लंदक्षिणेवांवटुकंअधःयांयोगिनींप
वंतत्रैवगंगंगांयंयमुनांश्रीलक्ष्मींपं
सरस्वतींचपंवंचतत्द्वारेसंपुटवामा
गंसंकोचेनपूजामंत्रपातगत्वानैऋ
त्यांब्रह्मणेनमः वास्तुपुरुषायनमः
इतिगंधपुष्पाभ्यांसंपूज्यादत्तसिद्धार्थ
तिलान्नाराचमुद्रया ॐसर्वविघ्नानुत्
सारयहुंफट्स्वाहा ॐपवित्रवज्रभूमेः
हुंहुंफट्स्वाहा अनेनभूमिमभिमंत्रये

प्र·पा·
२·
१·
10

त् ततोऽस्त्रमंत्रेण भूमिशोधनमस्थितानां सर्वा·
न्विघ्नांस्तांस्तान्समुत्सारयेत्ततः सिद्धार्थैस्ति·
समंमिश्रैः प्रोक्ष्य मार्ज्जनमनेन विशोधन अ
मन्त्रापि भूतापसर्पणं कुर्य्यात् मन्त्रेणाने
न साधकः यस्मिन् कृते स्थले भूता दूरं
यांति सर्वाश्चैते स्थितेषु सर्वभूतेषु नैव
यं मंतुला यथा विलपति सदालब्धनव
गृह्णंति देवताः तस्माद्यत्नेन कर्त्तव्यं भूता
नामपसर्पणम् कुमारीतंत्रेऽपि प्रणवं
पूर्वमुद्धृत्य सर्वविघ्नांस्ततः परम् उत्सा
रयततोऽस्त्रं फट् स्वाहा च तदनंतरम् अ
नेनैव च मंत्रेण विघ्नांस्तु त्सारयेत्सुधीः
प्रणवं पूर्वमुद्धृत्य रक्ष रक्ष तदनंतरम् अस्त्रं
फट् स्वाहेति मंत्रेण भूमिं च परिशोधये
त् ततः पवित्रवज्राद्यो प्रणवं पूर्वमुद्ध
रेत् वज्रहृदयं तत्तत्रैव फट् स्वाहा तद
नंतरम् अनेनैव विधानेन कुर्य्याद्भू
मिभिमंत्रणं अथासनानि यथा तत्र
कं मत्स्यमृत्के मृदुत्तुङ्कमासीनस्याम
पुकोमलेषु वा विस्तारेषु समाश्रिस

साधयेत्सिद्धिमुत्तमाम् श्रद्धांकषन्मा
मतोगर्भमतमाऊस्मण्डतुथाः कूडेप
नयेन्नेह्रीं नमतमचूडकविडः निकृत
चूडकोवालोह्रीनोपनयनः १ सान्
योमतः पचमेवर्षितमेवकोमलविडः
स्वतेऽपि कंवलेलोहितेवापिकु
लेवामात्रवर्मणि सन्नासीव्रलवा
गीचविशेनकुलस्यचर्मणि मनस्य
सूकेऽपि कुलमाऽठीपचर्मश्वचूडकं
वलंतथा पीतवस्त्रंचशुक्लंवासामना
यप्रकल्पयेत् शुक्लमालातंवे व्याघ्रा
जिनंसर्वसिद्धौज्ञानसिद्धौमृगाजिनं
वस्त्रासनंरोगहं वैत्रंजयश्रीतिवर्द्धनम्
कौषेयंपुष्टिदंप्रोक्तंकंवलंसर्वसिद्धि
दम् शुक्लंवायदिवारक्तंविशेषाद्रक्त
कंवलम् मडकोमलास्त्रीणांसग्राभे
पतितंह्रियम् जंतमापादितंवापिम
ग्नंवापिवरासनम् गर्भच्युतंवानारी॰
णांश्च्युवायोनिजांत्वचम् सर्वसिद्धि
प्रदंचैवसर्वभोगसमृद्धिदम् त्वंवक्रा

पुपा॰
२॰
११

यौवनस्थां नाकुर्य्याद्धीरवरासनम् श्म-
शानकाष्ठघटितं तत्पीठं वायज्ञदारुजम् न
दीक्षितो विशेज्ज्ञात्वा कृष्णसाराजिने गृही
उदासीनवनासीनस्नातकब्रह्मचारिणः
कुशाजिनांबरेणाथ चतुरस्रं समन्ततः
एकहस्तं द्विहस्तं वा चतुरङ्गुलमुच्छ्रितम्
विशुद्धेश्वासने कुर्य्यात्संस्कारेण पूजनं बु-
धः इति अत्र मृतासनमवश्यमेवप्रसवा
यश्रवणात् कालीतन्त्रे मृतासनं विनादे-
वियो जपेत्कालिकां नरः तावत्काले
नारकी स्याद्यावदाहूतसंप्लवम् यत्त
स्वतन्त्रादौ केवलाद्यासनमुक्तम् तन्त्र
स्वतन्त्रासनम् किं तु मृतकमुक्तमिति बो-
ध्यम् मृताभावे विष्टरमिति तदुक्तम्
मृताभावे विष्टरं च शावरूपं प्रकल्पयेत्
अथ भूमौ त्रिकोणमण्डलं कृत्वा तत्रा-
धारशक्त्यादिभ्यो नमः इति सम्पूज्य तदु-
परि विहितासनमारोप्य कृताञ्जलिः प-
ठेत् तदुक्तम् मेरुपृष्ठ ऋषिः प्रोक्तः सु-
तलं छन्द ईरितम् कूर्म्मो देवतादिविश्वा

सनायप्रकल्पयेत् विनियोगस्तकं वेतः
षद्भेहृत्वासमंततः पृथ्वित्वयाधृतालोका
देवित्वंविष्णुनाधृता तंचधारयमांनित्यं
पवित्रंकुरुचासनम् इतिपठित्वातदेवेपि
कुशांस्तत्रैवदापयेत् मायावीजमसुच्चा
र्य्यश्चाधारशक्तिमुच्चरेत् कमलासनमा
लिख्येत् नमोन्तंप्रपूजयेत् कुमारीकल्पे
पि आःकारांतसुरेखेविचवज्ररेखेविततःपर
हूंफट्स्वाहेतिकुर्य्यात् मण्डलंवशगास
ने वीरासनेनोपविशेत् संपूज्यासनमेव
च अथासनेनोपरिकुशत्रयदद्याद्दीश्चाधा
रशक्तयेकमलासनायनमः इतिसंपू
ज्य आः सुरेखेविवज्ररेखेविहूंफट्स्वाहा इति
मंत्रेणतत्रमण्डलिकांकृत्वातदुपरिवी
रासनेउपविश्यविजयांस्वीकुर्य्यात् त
दंकेभाववद्गुरुमात्मा विनादेतकमास्वा
द्य होमयुक्तोमहेश्वरः नपूजामसकुर्य्या
न्नध्यानंनचचिंतनम् तस्माद्गुरुत्काचपी
त्वाचपूजयेत्परमेश्वरी विजयाकल्पे
पि संविदासवयोर्मध्येसंविदेकगरीय

कृपा.
२.
१२

श्री संवित्प्रयोगमन्त्रेनेह पूजादौ साधकोत्त
मैः कर्तव्याचमनं पूजाकरणी याम निन्दि
तैः अमृतापि आनन्देन विना प्रयोगे न च तत्
ष्यन्ति देवताः तस्मात् पूजादौ विजया स्वी·
कार्या कार्यैः साधनस्थतन्त्री व्याख्याणि·
न्तविद्या वैष्णवाः शूद्रा च श्वेतरक्त कृष्णपी·
तप्रसूनभेदाः तासां शुद्धि विजयाकल्पा
नुसारेणलिख्यते संविदे ब्रह्मसंभूते ब्र·
ह्मपुत्रि सदानघे भैरवाणां च तृप्त्यर्थं पवि
त्राभव सर्वदा ॐ ब्रह्माण्यै नमः स्वाहा सा
धयेत् परं ततः इमं नेनाभिमन्त्रणम् सि
द्धिमूलि प्रिये देवि हीनबोधप्रबोधिनि रा
जप्रजावशाकारि शत्रुकण्ठत्रिशूलिनि पं
तविद्यायै नमः स्वाहा शोधयेत् परं ततः
अज्ञानेन्धनदीमाग्निज्वालाग्निज्ञानरूपि·
णि आनन्दस्याहुतिं प्रीतिं सम्यग्ज्ञानं प्र
यच्छमे ह्रीं वैष्णव्यै नमः स्वाहा शूद्रां सं
शोधयेत् ततः नमस्यामि नमस्यामि योग
मार्गप्रबोधिनि त्रैलोक्यविजये मातः स
माधिफलदा भव ह्रीं शूद्रायै नमः स्वाहा

ॐ अमृते अमृतोद्भवे अमृतवर्षिणि य
द्ंततः अमृतमाकर्षय ह्रं नु सिद्धिं देहि त
तः परम अमुकंमेततो ब्रूयात् वशमान
यततः परम् छिन्नान्तोयमन्त्रः प्रोक्तस्तत
ह्वानं वशायते उत्तरं तच्च मूलमन्त्रत
तोऽर्हदि तस्योपरि निर्योजयेत् आकाद्ह
नाद्हिस्रां चयेत् ब्रूयान्नीततः परम दिव
न्यस्त्रोटिकाभिश्च तालत्रयपुरःसरः दि
ग्बन्धनं तथा पाणिघातैर्विघ्नान्विद्या
नयेत सम्यग्यातर्पयेद्धलत्स्वमूलंज
पेन्मन्त्रम् गुरुपदेशसद्भावेन तथा संके
तमुद्रया त्रिधेवतर्पयेन्नश्रीसाधकः
सिद्धिमान्नरः एवंवदवदयदेवं ब्रूयात्वा
गवादिनिततः परम् ममजिह्वाग्रेस्थि
राभवसर्वपदंततः सर्वरशांकरीस्वा
हेतिं मन्त्रेणाजन्कयान्नृदे संकेतमुद्रा
यातस्वमुद्रयाऽस्यार्घ्यः ॥
अथसाधकः वामकर्णाग्रेऽमुकानन्द
नाथ श्रीभैरवगुरुपादुकाभ्यो नमः
दक्षिणकर्णाग्रे गंगणपतिं मध्ये उपदे

श्रा·
२·
१२
13

वतां नमस्कृत्य सामामोदकेन पूजनस्थाना
दिकं सम्भृत्य सर्वं दक्षिणे गंधपुष्पादिकं वा
मे सर्गं पात्रं जलं देवतायाः पश्चिमे कुलदे
वतायाः स्थापनीयमतत्पात्रं च देवतावामे
धारयेत् तदूर्ध्वं कुलवृक्षमणौ कुलामृ
तं ततोऽथ त्वात तदर्घ्यं यथाशक्ति कुलामृ
तं ततो वटुकागुरुपूजाक्रमेण च आत्मशुद्धि
पीठशुद्धिं प्राणायामं न्यासादि भैरव कृत्वाचार्य
ततो विधानं कुर्यात् कुलविचेष्टितं दीक्षि
ताभिः कुलीनाभिर्युवतीभिः कुलाङ्गनाभिः
देवतागुरुभक्ताभिर्भावितं यागभूमिपु
नानाविधानि पुष्पाणि गन्धानि विविधा
नि च कर्पूरजातीधूपादिवासितं पटवा·
सितं ताम्बूलं देयमन्यं च धूपदीपादिकं च य
त् सर्वालंकारभूषाभिभूषितः कौलिके
श्वरः मूलमन्त्रं जपन्तोयैः प्रोक्षितं स्था
पयेत्ततः सर्वं स्वदक्षिणे स्थापयेद्वामे चार्घ्यं
निवेदयेत् पश्चिमे देवतायाश्च कुलद्रव्या
णि धारयेत् पश्चिमे पूर्वे समर्घ्यः कालिका
पुराणेऽपि मदिरां पूजनोद्यादस्य पात्रं च

वामतः कल्याणिवेपि आत्मस्थानमनुस्थ
देहशुद्धिस्तु पंचमी यावन्नकुरुते देविता
वदेवार्चनं कृतः मातृकान्यादेहशुद्धिस्तु प्राण
यामादिभिः प्रिये षडंगानि न्यसेन्मंत्री आ
त्मशुद्धिरितीरिता गृहीत्वा मातृकावर्णं
मूलमंत्राक्षराणि तु क्रमोत्क्रमाद्द्विरा
वृत्तिर्मंत्रशुद्धिरितीरिता पूजाद्रव्यादि
संप्रोक्ष्य मूलाख्याभ्यं विधानतः धेनुमुद्रां
दर्शयेद्द्रव्यशुद्धिरितीरिता पीठे देवीं प्र
तिष्ठाप्य सकलीकृत्य मंत्रवित् मूलमंत्रे
णदीमात्मात्माभिमायोदकेन च त्रिवारं·
प्रोक्षयेत्स्थानदेहशुद्धिरितीरिता पंच
शुद्धिं विधायेत्थं पश्चाद्यजनमाचरेत्
अन्यत्रापि पंचशुद्धिविहीनेन यत्कृ·
तं न च तत्कृते पंचशुद्धिर्विना पूजाभि
भिचाराय कल्पते आत्मशुद्धिः स्थान·
शुद्धिं मंत्रस्य शोधनं तथा द्रव्यशुद्धिर्दे·
हशुद्धिः पंचशुद्धिरितीरिता अथ कुमा
रीकल्पे षण्णविष्ठानेषण्णस्वप्रणवं पू
र्वमुद्धरेत् ततोभिषेकेति पंचदशानामी·

प्रया॰
र॰
१४
14

तिततःपरम् सेकेतिचपटं प्राक्षां हुं फट्
स्वाहा ततःपरम् अनेनमन्त्रेणादेव्याः पूज्या
धिष्ठानमेवच प्रणवं पूजकेनाश्रतथा ग
जां हृतेपिच शान्तायसम्यग्रक्षार्थं सवह्ला
यतनस्थेऽ पुष्पं पुष्पमहापुष्पं सहपुष्प
पुष्पं संभवे पुष्पचयावकीर्णे हुं फट् स्वा
हेति ततःपरम् विशोद्ध पुष्पमनेनजल
पूर्ववद्वाहरेत ओं शान्ताभिषेक ओं शान्ताभि
षेक हुं फट् स्वाहेति मन्त्रेण पुष्पमधिष्ठा
यओं पूजकेनराजाहृते शान्तायसम्य
क्संरक्षाय इति पुष्पमभिमन्त्र्य पूजाद्र
व्यादिकं मूलान्ते फडिन्द्रनेनाभ्युक्ष्य येनु
मुद्रया अमृतीकृत्य वामपार्श्वे न्यात त्रय
फडिति मूलेनाकृत्वा तर्जनीमध्यमाङ्गु
ष्ठैः ह्रैं तालत्रयं दत्वा तर्जन्यङ्गुष्ठाभ्यां
छोटिकाभिर्दशदिग्बन्धनं कुर्यात् दि
हृस्वादिध्यान् विघ्नानुत्सार्य्य ह्रमिति
चतुर्दिक्षु वह्निप्राकारं ध्यात्वा मूलमन्त्रे
ण हृदये हृं संसार्य प्राणायामं कुर्यात्
यथा मूलाधारे मनः संयोज्य हृदि प्राणायु

ष्ठेन दक्षिणनासापुटं धृत्वा मूलमंत्रं प्रण
वं वा षोडशवारं जपन् वामेन वायुमापू
र्य कनिष्ठानामिकाभ्यां वामनासापुटमपि
विधृत्य तत एव चतुःषष्टिवारं जपन् वायु
कुंभयित्वा पुनर्मूलं द्वात्रिंशद्वारं जपन्
दक्षिणेन वायुं रेचयेत् एवं क्रमोत्क्र
मेण प्राणायामत्रये कृते एकः प्राणा
यामः इति वारत्रयं कुर्यात् तदुक्तं स्व
तंत्रे पाणिर्लिप्तजानुकरास्फोटसमुद्भावि
तवर्णकैः तालत्रयमथो स्यात् मण
वं सुप्रसादं च जपेच्चन्द्रनेत्रवासैर्वा
सैर्वेदाधिकैः प्रिये मात्राभिः प्रणवं ज
प्त्वा पूरकुंभकरेचकैः प्राणायामस्ततः
कृत्वा भूतशुद्धिं ततश्चरेत् अन्यत्रापि
मनोजीवात्मनः शुद्धिः प्राणायामेन
जायते कालोत्तरेपि प्राणायामत्रयं
कुर्यान्मूलेन प्रणवेन वा नासाग्रेपि
कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधा
रणं प्राणायामः स विज्ञेयस्तर्जनीम
ध्यमे विना अथ गौतमीये भूतशुद्धिं

पुपा· लिपिमांसविनाघल्लप्रपूजयेत् विपरीते
२· फलंदद्यादभक्त्यापूजनं यथा ततोभूत
१५ शुद्धिंकुर्य्यात् तद्यथा मूलाधारपद्मात्कु
लकुण्डलिनींप्रसुप्तभुजगाकारांसार्द्ध
त्रिवलयांस्वयंभूलिंगवेष्टिनीं विचिंत्य त
तनीयंमीतड़ित्पुंजप्रभांहंसइतिमंत्रे·
णपृथिव्यासहस्वाधिष्ठानंसमानीय
तत्रस्थजलेपृथिवींविलीनांविचिंत्यत।
स्माज्जलेनसहमणिपूरस्थवह्नौतज्जलं
विलीनंविचिंत्यतस्मान्मणिपूरात् व
ह्निनासहअनाहतमानीय तत्रस्थवा·
यौवह्निंलीनंध्यात्वा तस्मादनाहताज्जी
वात्मनासहविशुद्धस्थाकाशेवायुंली
नंकृत्वातस्मादाकाशेनसह आज्ञाच
क्रस्थमनस्याकाशंलीनंविचिंत्यम
नोनादेलीनंविधायययवर्णोभ्वनिंसम·
र्पयेत् ततःसहस्रदलकमलकर्णिका
स्थचंद्रमंडलमध्यत्रिकोणान्तर्गतवि
श्वरूपपरमशिवेकुण्डलिनींजीवा
त्मानंचनिष्कलरूपतांविभाव्यप्राणा

ध्यामविधिनायमिति वायुवीजं धूम्रवर्णं
षोडशवारं जपन् पापपुरुषेण सह शरी-
रं संशोषयामिति वह्निवीजं रक्तवर्णं
चतुःषष्टिवारं जपन् तं संदहयमिति
वरुणवीजं शुक्लवर्णं द्वात्रिंशद्वारं ज-
पन् तद्भवामृतहृत्स्थानिछ्यांप शरीरंउ-
त्पाद्य लमिति पृथ्वीवीजेन पीतव-
र्णं ध्यायेन् शरीरं स्वरूपीकृतमेवाहमि-
ति मंत्रेण कुलकुण्डलिनीममृतलीला-
पंचभूतजीवात्मानं च ब्रह्मपथेन स्व-
स्वस्थाने नियोजयेत् तदा देवीरूपमा-
त्मानं ध्यात्वा हृदि हंसं निधाय जीवं न्य-
सेत् यथा श्रां ह्रीं क्रीं हंसः श्रीदक्षिण-
कालिकायाः प्राणा इह प्राणाः श्रां ह्रीं
क्रीं हंसः अमुष्या जीव इह स्थितः श्रां
ह्रीं क्रीं हंसः अमुष्याः सर्वेन्द्रियाणि श्रां
ह्रीं क्रीं हंसः अमुष्या वाङ्मनश्चक्षुः श्रो-
त्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठ-
न्तु स्वाहा इति जीवं न्यसेत् ततोऽंकसं ते वे
संहारक्रमयोगेन पंचतत्वं समुद्धरेत

पूप. १. १९

16

शोषयेत् ह्रूं लवान्तःक्षुत्वा कायगतं सलिलाप्ल
वैः ततो मांसं प्रकुर्वीत फेत्कारीतंत्रे द्वि
ते अन्यत्रापि देवीरूपं ततो ध्यायेद्दृश्यमान
मानकमले हृदये ततो जीवं प्रविश्य स्वपा
शादिअन्तरेणान्त प्राणमंत्रेणामुकेन ततः
अमुष्याः पदं ततः प्राणा इति पदं पश्चादिह
प्राणाः पदं ततः सर्वेन्द्रियाण्यमुष्या ते वा
मनो नयनं ततः श्रोत्रघ्राणपदात् प्राणा
इहागत्य सुखं चिरं तिष्ठन्तु वह्निजायांततः
प्राणमंत्रोऽयमीरितः प्रकारान्तरे च ज्ञा
नार्णवे विपरीतं प्राणमंत्रं विलिखेत् पाश
पूर्वकं प्राणप्रतिष्ठामंत्रोऽयं सर्वकर्मा
णि साधयेत् अमुष्या इति पदानि बोद्ध
व्यानि इति शिवप्रदायिकाः अमुष्याः स्था
ने षष्ठ्यन्तं नाम प्रयोक्तव्यं ततुकं नाराय
णीये अमुकपदं यद्रूपं यत्र मंत्रे दृष्टप
ते साध्याभिधानं तद्रूपं तत्र स्थाने नियो
जयेत् कुमारीकल्पेऽपि भूतशुद्धिविधा
यिन्यं देवीरूपमात्मानं चिंतयेत् ॐ ह्रां ह्रीं क्रों फ
ट् स्वाहा अनेन कायवाक्चित्तशोधनं

कृत्वा रक्तं हूं फट् स्वाहा अनेन हृदि हस्तं द
त्वाऽऽत्मरक्षां विधाय स्ववामे ललितां गुरुदे
वतां नवयौवनगर्वितां विधाय भूतशुद्धिं
प्राणायामान् कारयित्वा यथोक्तमातृके
न् तत्र कं तैरेव प्रणवं पूर्वं चैव स्वाहाद्यं विशे
षणमेव च हूं फट् स्वाहा मन्त्रः प्रोक्तः का
यवाक्कवित्वशोधने रक्तं हूं फट् ततः स्वा
हा मन्त्रः स्यादात्मरक्षणे ततः षोडशवर्षी
यां ताशिमानीय मन्त्रवित् युवतीं वामदे
शतां सर्वेशाचारुहासिनीं सदाकामा
भिलषितां सिन्दूरांकितभालिकां साय
के प्रेमसंपन्नां वामे संस्थापयेद्बुधः त
स्याश्च भूतशुद्ध्यादीन् कृत्वा तु मातृकां
न्यसेत् प्राणायामं मातृकां च कारयित्वा
यथाविधि अथ ऋष्यादिन्यासं कुर्यात्
यथा कृतांजलिः भैरवऋषिरनुष्टुप्छ
न्दः श्रीदक्षिणकालिकादेवता क्रीं बी
जं हूं शक्तिः क्रीं कीलकं रक्षार्थकाममो
क्षरूपार्थं च तत्त्वसिद्धिपूर्वकं दिव्यज्ञा
नं तत्कवित्वपाण्डित्यसिद्ध्यर्थे विनियोगः

श्या॰
२॰ ७
17

इत्यभिलष्यपुष्पेणानामयावान्यसेत् यथा
शिरसि भैरवऋषये नमः मुखे उष्णिक्छन्द
से नमः हृदि श्रीदक्षिणकालिकायै न
मः गुह्ये ह्रीं बीजाय नमः पादयोः हूं श
क्तये नमः सर्वांगे क्रीं कीलकाय नमः
तदुक्तम् भैरवोऽस्य ऋषिः प्रोक्तः उष्णि
क्छन्द उदाहृतं देवता कालिका प्रोक्ता
लज्जा बीजं तु कीलकम् शक्तिस्तु कूर्चबी
जं स्यादनिरुद्धसरस्वती कवित्वार्थे विनि
योगः एवमृष्यादिकल्पना कवित्वार्थे वि
नियोगः इत्युपलक्षणम् यद्यस्याभिल
षितं तदर्थे विनियोगः इत्यर्थः तत्र विविध
श्रवणात् तदुक्तं कालीक्रमे कीलकं
वाग्बीजं तु चतुर्वर्गार्थसिद्धये उत्कलक्र
ममते भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक्छ
न्द उदीरितम् दक्षिणा कालिका देवी
चतुर्वर्गफलप्रदा अथ तंत्रांतरे ऋषिं
मे मूर्ध्निदेशे छन्दस्तु मुखपंकजे देवतां
हृदये चैव बीजं तु गुह्यदेशके शक्तिस्तु
पादयोश्चैव सर्वांगे कीलकं न्यसेत् मो

न सिध्येदभिषिक्तो ऽपरिज्ञानान्न मंत्रफ
लभाग्भवेत् नैव सिध्यन्ति मंत्राणां वि
नियोगमजानताम् ॥
अथ करांगन्यासो ॐ ह्रां अंगुष्ठाभ्यां न
मः इत्यंगुष्ठयोः ॐ ह्रीं तर्जनीभ्यां स्वाहा
इति तर्जन्योः ॐ ह्रूं मध्यमाभ्यां वषट्
इति मध्यमयोः ॐ ह्रैं अनामिकाभ्यां
हुं इत्यनामिकयोः ॐ ह्रौं कनिष्ठा
भ्यां वौषट् इति कनिष्ठयोः ॐ ह्रः कर
तलपृष्ठाभ्यां नमः इति करतलपृष्ठ
योः इति करन्यासः अथवा सर्वत्र नम
स्कारांतेन करन्यासः ततः ॐ ह्रां हृद
याय नमः इति हृदि तर्जनीमध्यमाना
मिकाभिः स्पृशेत् ॐ ह्रीं शिरसे स्वाहा इ
ति शिरसि तर्जनीमध्यमाभ्यां ॐ ह्रूं
शिखायै वषट् इति शिखायां मुष्टिक
नाधोमुखांगुष्ठेन ॐ ह्रैं नेत्रत्रयाय वौ
षट् इति नेत्रत्रये तर्जनीमध्यमानामि
काभिः ॐ ह्रः करतलपृष्ठाभ्यां फट् इ
ति करतलपृष्ठयोः ततः ॐ ह्रः अस्त्रा

श्या॰
२॰ यफट् इत्यनेन तर्जनीमध्यमाभ्यां मूर्द्धि
१८ ऊर्द्धोर्द्धं तालत्रयं दत्वा छोटिकाभिर्दशदि
ग्बन्धनं कुर्य्यात् तदुक्तं कालीतन्त्रे अंग
न्यासकरन्यासौ यथावदभिधीयते ष
ड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्
हृदयाय नमः प्रोक्तं शिरसे वह्निवल्लभा
शिखायां वषडित्युक्तं कवचाय हुमीरितं
नेत्रत्रयाय वौषट्स्यात् अस्त्राय फट् प्रकीर्ति
तम् बीजमन्त्राय बीजेन लघुपारिभाषिकं
तन्त्रान्तरे स्वरस्यात् रुद्रतन्त्रेपि प्रणवं वाग्भ
बीजं च षड्दीर्घस्वरभाषितम् कुर्य्यात्
षडंगविन्यासं मूलखण्डत्रयेण वा अथ
प्रकारः आद्यसप्तबीजेन हृदयम् द्वि
तीयखण्डषडक्षरेण शीर्षम् तृतीयख
ण्डेनवाक्षरेण शिखा पुनराद्येन क
वचं द्वितीयेन नेत्रत्रयं तृतीयखण्डेना
स्त्र इत्यंगन्यासं कुर्य्यात् भैरवतन्त्रेपि
षडंगानि न्यसेन्मन्त्री त्रिः सकृद्वा यथाक्रमं
अथ वर्णन्यासं कुर्य्यात् अं आं इं ईं उं ऊं ऋं
ॠं लृं लॄं नमो हृदि एं ऐं ओं औं अं अः कं

खं गं घं नमो दक्षभुजे ङं चं छं जं झं ञं टं
ठं डं ढं नमो वामभुजे णं तं थं दं धं नं पं फं
बं भं नमो दक्षजङ्घायां मं यं रं लं वं शं षं सं हं
लं नमो वामजङ्घायां न्यसेत् तदुक्तं का
लीतन्त्रे एवं यथाविधिं कृत्वा वर्णन्यास
माचरेत् अआइईउऊऋॠऌॡवै
हृदये न्यसेत् एऐओऔ ततः अं अः क
खगघङ न्यस्ततः उक्ताच्च दक्षिणभुजे
न्यसेत् साधकसत्तमः ङं चं छं जं झं
टठडढ तथा पुनः इति वामभुजे न्यस
णतथदधनः स्मरेत् पनपफबभ दक्षि
णे जङ्घके न्यसेत् मयरलवशषसह
ल वामजङ्घके नित्यं लिखितवर्णस्व
रूपात् विन्दुरहितवर्णन्यासः विन्दुमा
मतेन सविन्दुरेव न्यासः प्रमाणं तदुक्तं
कवचे लिपिन्यासः ऋषिर्ब्रह्मा भवेच्छ
न्दो गायत्री मातृका पुनः देवतास्य जं
ने बीजं शक्तयः स्वरास्ततः अव्यक्तं
कीलकं न्यासउक्तः क्रमेण तु ऋऋइ
तिसृषु बीजकूटादि क्रमवत् क्रमेण न्यसे

प्रपा·
२· सेदिमर्थः षडङ्गं मातृकायाश्च साधकः ।
१९ कारयेत्ततः स्वराणां क्लीवहीनानां ऋ ॠ
लृ ॡ रहितानामित्यर्थः एवं विधिना मा
49 तृकां षडङ्गं कृत्वा ध्यायेत् यथा शारद
तिलके शुभ्रा सकलगुणमयी लोलरक्त
त्रिनेत्रा शुक्लालङ्कारभूषा शशिशिखमुकुट
जटाटोपपृथुकेशमध्या पुस्तकस्रक्कृप
णाङ्कभान्वरमपि दधती शुक्लपद्मा व
राम्भोजवाग्देवी प्रसन्नवक्त्रा उरुचभरनमिता
चिन्तयेत्साधकेन्द्रः एवं ध्यात्वा ललाटा
टादिक्रमेण अकारादिक्षकारान्तक्रमे
ण न्यसेत् यथा श्रीक्रमे ब्रह्मरन्ध्रं तथा
वक्त्रे वृत्ते नेत्रयुग्मद्वये श्रुतिनासापुटद्व
न्द्व गण्डोष्ठद्वयकेऽपि च दन्तयुग्मे च मूर्द्धा
स्यवदनबाहौ शाखाविन्यसेत् दोःपत्सन्धि
षु साग्रेषु पार्श्वयुग्मे स्पृशेत्पुनः पृष्ठ
नाभिद्वये च वक्त्रजठरे विन्यसेद्धृदय त्वगसृ
ङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः प्रा
णजीवौ च परमात्मा यकारादिषु संस्थिताः
एवं क्रमेण देवेशि सत्तव्यापकतात्मिका ।

हृदोर्मूलेपिविन्यस्यतच्छापगलेन्यसेत्
करमूलेहृदारभ्यकाणिपादयुगेतथा ज
ठराननयोश्चापिन्यासेदिमाणिरूपिणीं
एवंन्यासानाणिव अथमन्त्र ललाटमुखवृत्ता
लीत्यादि अथप्रयोगः श्रींनमोब्रह्मर
न्ध्रे ललाटेवा श्रींनमोमुखवृत्ते एवं
क्रमेणामकारपर्य्यन्तंविन्यस्य यंत्वगा
त्मनेनमः रंअसृगात्मनेनमः लंमांसा
त्मनेनमः वंमेदसात्मनेनमः वामांशे
कफदिवा प्राअसृगात्मनेनमः षंमज्जा
त्मनेनमः संशुक्रात्मनेनमः हंप्राणा
त्मनेनमः लंजीवात्मनेनमः क्षंपरमा
त्मनेनमः इतिविशेषः पंचाशद्वर
र्णामनुःक्रमेणैवप्रकाशितः श्रींमायेतो
नमोन्ताक्षरसविन्दुर्विन्दुवर्जितः माया
लक्ष्मीवीजपूर्वोमन्त्रमध्येतेवुधैः ल
लाटेऽनासिकामध्येविन्यसेन्मुखवृत्तके
तर्जनीमध्यमानामासुहृष्टानामाश्चनेन
योः अंगुष्ठकर्णयोर्मध्येकनिष्ठांगुष्ठ
कौनमोः मध्यमास्तिस्रोगेउच्चोष्ठमध्य

पुपा॰ २॰ २॰ 20

नासाग्रयोर्विन्यसेत् अनामांगुलयोर्विन्यसेन्म-
ध्यमांगुलमांगके मुखे ऽनामामध्यमांच
हस्तपादेच पार्श्वयोः कनिष्ठानामिकाम
ध्यमास्तालु पृष्ठे च विन्यसेत् ताः सांगुष्ठाः
नाभिदेशे सर्वाः कुक्षौ च विन्यसेत् हृदये
च तले सर्वं मस्तयोरस्य ककुत्स्थले हृत्
पूर्वं हस्तपत्कुक्षिमुखविभुतलमेवहि प
तालमातृकाङ्गुष्ठाः क्रमेणपरिकीर्तिताः
अन्तराविन्यसेद्यस्तु सामकः स्यात्स नि
ष्फलः ॥ अथ श्रीकण्ठमातृन्यासो यथा
विन्यसेन्मातृकास्थाने श्रीकण्ठादीन्यथा
क्रमं पूर्णोदर्यादिभिः सार्द्धं मातृकार्णस
मन्वितान् श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्ति
रमरेश्वरः अर्घीशो भारभूतिश्चातिथीशः
स्थाणुकोहरः किण्टीशो भौतिकः सद्यो
जातश्चानुग्रहेश्वरः अक्रूरश्च महासेनः
क्रोडशस्वरमूर्तयः पश्चात्क्रोधीशश्च
चण्डेशः पंचान्तकः शिवोत्तमाः अथैकरुद्र
कूर्मैकनेत्राश्च चतुराननाः अजेशः स
र्वसोमेशस्तथा लांगलिदारुको अर्द्ध

नारीष्ठस्थोमाकांतस्थाघाडिदण्डिनौ सु
रत्रिमीनमेघाण्यो लोहितस्थशिखीतथा
ज्वालाण्डे द्विरण्डेशो समहाकालवालि·
नो भुजंगेशपिणाकीशश्वेतोप्यावके
श्वरः श्वेतमहग्रीवाप्रानऊलिशिवाः संवर्त
कः स्मृतः एते रुद्राः स्मृता रक्ताद्यतस्मु
लकपालकाः सुणीदरीस्याद्विजयाशा
ल्मलीतरनंतरं लोलाक्षीवर्त्तुलाक्षीच
दीर्घघोणामसीरितः सुदीर्घमुखीगोमु
खीदीर्घजंघातथैवच कुंभोदर्यूर्ध्वके
शीच तथा विकृतमुख्यपि ज्वालामुखी
नतोज्ञेया पश्चादुल्कामुखीतथा श्रुली
मुखीच विद्यामुख्येताः प्रोक्तशक्तयः
महाकाली सरस्वत्यै सर्वसिद्धिसमन्वि·
ते गौरी त्रैलोक्यविद्या च मंत्रशक्तिस्त
तः परम् आत्मशक्तिर्भूतमाता तथा ल
म्बोदरी मता द्राविणी नागरी भूयः खेच·
री चैव मंजरी रूपिणी वारिणी पश्चात
काकोदर्यपि पूतना स्याद्भद्रकाली यो·
गिन्यो शंखिनी गर्जिनी तथा सकालरा·

श्या.
र.
२१

त्रिकुक्षिम्योकपर्दिन्यापिवज्रिणी जयाचस
मुविष्ठच्छारेवतीमाधवीतथा वारुणी
वायवीप्रोक्तापश्चादुक्तोविदारिणी ततश्च
सहजालक्ष्मीर्व्यापिनीमाययान्विता एता
रुद्राकपीठस्थाः सिन्दूराह्वणविग्रहाः र
क्तोत्पलकपालास्यात्र्यलंकृतकरांबुजा
अथप्रयोगः यथा अंश्रीकंठपूर्णोदरी
भ्यांनमः इतिललाटे श्रींअंअनंतवीजाभ्यां
नमः इतिमुखवृत्ते एवंक्रमेणसर्वंकुर्या
त ॥ अथबोटान्यासः तउक्तंवीरतंत्रे
केवलोमातृकाकृत्वामातृकांतारसंपु
टा मातृकापुटितंतारंमायेनसाधकस
नमः ॐअंॐएवंतथैवमातृकापुटितं
एवंकामपुटितं ततपुटितंकामं शक्ति
पुटितंततत्पुटितांशक्तिं लज्जापुटितं
ततपुटितांलज्जां मंत्रपुटितांतत् ततपु
टितंमंत्रं पुनरनुलोमविलोमतः केवल
मंत्रं मातृकास्थानेन्यसेत्अष्टोत्तरशतं
नव्यापकंकुर्यात् इतिगुप्तेनतुगंया
अगबोटाप्रकीर्तिता तारायाःकालि

21

कायाश्च तन्तुभोश्च तथापिवा कृतेस्मिं
आसवर्ज्यं तु सर्वपापप्रणश्यति विषाप-
मृत्युहरणं ग्रहरोगादिनाशनं उष्ठुसत्वा
विनश्यंति शत्रवो यांति मित्रतां कविता
लहरीनस्पृहावारसपरंपरा आतिमाय
ष्टसिद्धिस्तु तस्य हस्तेष्ववस्थिता कायि
कं वाचिकं वापि मानसं वापि दुष्कृतं स-
र्वं तस्य विनाशं च याति मासस्य चिंतनात्
प्रस्फुरत्तं यथाति यत् किंचिदुपपातकं
यत्तुं पं दृश्यते यापि सततं पवगाच्छति यंत
मंति महेशानि शोच्छापूटितविग्रहाः अ
स्याश्चः समवेतस्यो देवताकं पते मिया
श्चातन्त्यामः मूलविद्यासंतेत्रे आत्मवि
द्याशिवस्तत्त्वे तत्त्वन्यासं समाचरेत् आ
यजीवन्यासं कुर्यात्तु यथा कुमारीतं त्रे
बलान्त्ये भुवो मध्ये ललाटे नाभिदेशके
गुह्ये वक्त्रे च सर्वांगे स सवीजान्तकमान्
मसेत् ॥ अथप्रयोगः आद्यबीजमु-
च्चार्यं नमो बलारव्ये पंचवर्णितीयबीजमु
ति तृतीयं भाले चतुर्थं नाभौ पंचमंगु-

श्या॰
२॰
२२

ते षष्ठवक्त्रे सप्तमसर्व्वांगे न्यसेत् ततःप्रण
वपुटितमूलेन व्यापकंन्यासं कुर्य्यात् नव
धा सप्तधा पंचधा वा मस्तकादिपादपर्यं
ते पादादिमस्तकांतं न्यसेत् तदुक्तं भैर
वतंत्रे पंचधा नवधा वापि मूलेन सप्तधा
तथा व्यापकं कुर्य्यादित्यादि स्वतंत्रेपि मू
लेन व्यापकं न्यासं नवधा कारयेत् प्रिये
इति महामहोपाध्यायश्रीपरमहंसपरिव्रा
जकश्रीपूर्णानन्दगिरिविरचिते श्यामा
रहस्ये आगमांतविवरणं नाम प्रथमः परि
च्छेदः ॥ अथांतर्यजनं वक्ष्ये दृष्टादृ
ष्टफलप्रदं गुरुध्यानं प्रकुर्वीत यथाह शैवे
विशालधीः स्नायाद्वा विमले तीर्थे गु
रुहृदयाश्रिते विनुतीर्थेन वा स्नायात्पु
नर्जन्म न विद्यते ईशानस्त्वप्रभो शिवतीर्थे
केस्मिन् स्नानं तु शर्वोऽस्य हृतः शरीरे व्र
ह्मांभुभिः ख्यातिनयाः सदाय: किं तस्य गा
गैरपि पुष्करैर्व्वा इति स्नानम् शिवश
क्त्योः समायोगो यस्मिन् काले प्रजायते
सा संध्या कुलनिष्ठानां समाधिस्थैः प्रती

22

येत् इतिसंरक्ष्योपासनम् अथमूलाधारात
कुलकुण्डलीसोमसूर्याग्निरूपिणीम्
समुत्थाप्यपरविन्दुनिर्भिद्यदेहदेवतांतर्प
येत् तदुक्तम् वन्हकीनलसमुत्थाकुलि
नेयतत्परामृतम् तेनामृतेनदिव्येनतर्प
येत्तेनदेवताम् इतितर्पणम् ब्रह्मरन्ध्रा
द्योभागेयच्चान्द्रपात्रमृतममम् कलासा
यनसंरक्ष्यतर्पयेत्तेनखेचरीम् इत्यासा
यनम् आधारेलिंगनाभौहृदयसरसि
जेतालमूलेललाटेहृत्पद्मेषोडशारेहि
दशादशादलेहादशार्द्धेचतुष्केवासा
नेवालमध्येडफकठसहितेकंठदेशे
स्वरांश्चहक्षौकोणदिसमध्येमसमस्तविम
लयीसांसमंत्रपरिसिद्ध्यै इतिमातृका
र्णान्कंठवृन्दक्रमेणध्यायेत् अथव
र्गमासः तदुक्तंगौतमीये इत्यमानहृ
दयोऽयंहृदयेस्याच्चिदात्मकः क्रियतेत
त्परत्वेनहृत्कंठेणततःपरम् सर्वज्ञा
दिगुणोपेतंगेसंविदुपपरात्मनि क्रियते
विषयाहारःशिरोमंत्रेणदेशिकः हृद्बि

पृ॰पा॰
२॰
२३
23

गोत्रप्रसिद्धाममसमयतामाभावनात्‌ह्वा क्रियते
निजदेहस्य शिखां मंत्रेण देशिकः सर्वात्म
कस्य देहस्य मंत्रवाक्येन तेजसा सर्वतोप
रिमंत्रेण ब्रह्मसद्मनि संस्कृतिः इति श्रीहिम
नीयवह्निलत्वाणि यत्रत्वणोर्हिंसाणांहिं
सोपायानप्रवर्त्तते इत्यर्थः यो ददाति परं
ज्ञानं संविद्रूपे परात्मनि हृदयादिमंत्रतेजः
स्पादेतन्मैव संस्कृतम् आध्यात्मिकादिदे
पद्यतसाधकस्य विनाशयेत् अविद्याशान
मंत्रतत्परं यामसमीरितम् इति षडंगसा
संविधाय ध्यानं कुर्वीत यथा उदयाक
रुपहृत्सा शक्ति द्वयपुटांत स्थूलतत्त्वय॰
समस्थितं सोतिसत्त्वमयं ध्यायेत्कुला
कुलनियोजनात् अथवा षडंगाटद्वयम
ध्यस्थशक्तिद्वयपुटीकृतम् सदासमर
संध्यायेत्कालानंतकुलयोगिना अ
मध्व किरणस्य तदग्निस्थचन्द्रभास्कर
मध्यगं महाशून्ये नयेत्कुलात्पूर्णप्ति
प्तुति योगिराट् महाशून्य इति सर्वोपाधि
विनिर्मुक्ते पूर्णे इति सर्वोपाधिविनिर

र्मोऽज्ञानविभागविरहात्तर्पणमेवं भवती
ति अथवा निरालंबपदेऽस्मिन्यत्नेनउप॰
पद्यते न हंसमभ्यासेत्त्रिसंध्यानं न तु कुल
योगिनाम् न हंसमिति अतः करणस्य
अभ्यासेदितिवारंवारं कुर्यादित्यर्थः उ
त्थानम् अद्वैयन्तुविषयैः षष्ठैस्तत्
णात्तन्मयो भवेत् मामस्तन्मयता बुद्धिः
सोऽहंभावेन पूजयेत् तन्मयति न देवान्स
तत्त्वज्ञानं सोऽहमिति तत्त्वपरशोषणार्थं
परिचिंतनमात्रपूजोपकरणमित्यर्थः
विषयपुष्पाणि यथा अमायामनहंका
रमरागामपदं तथा अमोहकमदंतचा
न्तद्वेषाह्लोभकं तथा अमानमत्सरमलो
भं च दशपुष्पाविदुर्बुधाः अहिंसा परमं पु
ष्पं पुष्पमिन्द्रियनिग्रहम् दयापुष्पं क्षमा
पुष्पं ज्ञानपुष्पं च पंचमम् इत्यष्टसमभिः
पुष्पैः पूजयेत्परमेश्वरीम् इति पूजनम
मातृकापंचाशिकाप्रोक्तामत्र्यंशाक्तिशिवा
त्मकं प्रथिताकुण्डलीशक्तिः कल्पितेमे
रुसंस्थितः एवं विधिनावर्णमालामुप

पृता.
२.
२४
24

स्कुम्भस्तमेहं स्वरूपं कृत्वा अकारादिक्षकारांतं ल
कारादिश्रीकंठांतं मूलमंत्रं जपित्वा परतेजसि
समर्पयेत् अथहोमः आत्मानमपरिच्छिन्नं
विभाव्यानंतरं वा परमात्मतत्त्वात्मस्वरूपं वत
रंतश्चितकुण्डे मानन्दमेखलायुतं अर्धमात्रा
कृतयोनिभूषितं नाभौ ध्यात्वा वन्हिमप्रस्थस्ता
नाग्नौ जुहुयात् यथा मूलांते नाभौ चैतन्यस्व
पाग्नौ हविषा मनसा स्रुचा ज्ञानप्रदीपितेन
समस्तवृत्तिं जुहोम्यहं स्वाहा अनेन प्रथमाहु
तिं दद्यात् मूलांते धर्माधर्महविर्दीप्ते आ
त्माग्नौ मनसा स्रुचा सुषुम्नावर्त्मनानिस्
मस्तवृत्तिं जुहोम्यहं स्वाहा इति द्वितीयाहुति
दत्वा मूलांते प्रकाशाकाशहस्ताभ्यामव
लंब्योन्मनीस्रुचा धर्माधर्मफलस्नेहपू
र्णं वह्नौ जुहोम्यहं स्वाहा अनेन तृतीयाहु
तिं दद्यात् ततो मूलांते अंतर्निरंजननिव
र्त्यनमेयमाने मायान्धकारपरिपन्थिनि सं
विदग्नौ कस्मिंश्चिदद्भुतमरीचिविकाशभू
मौ विश्वं जुहोमि वसुधादिशिवावसानं
इसंतर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत् न

तस्य कायपतनान्ते जीवन्मुक्तो भवेद्ध्रुवम् ॥ इति
श्रीमायारहस्ये द्वितीयपरिच्छेदः ॥ २ ॥ अथ साध·
कः कुलवेशं कृत्वा कुलवेशं च कारयित्वापी
ठमासं कुर्यात् तदुक्तं कुमारीतन्त्रे ततस्त्री
वेशधारी स्यात् सिन्दूराङ्कितभालकः ए
गारोत्वलवेशात्वक्स्ताम्बूलपूरिताननः एवंवे
शादिकं कृत्वा वनितामपि कारयेत् पीठमा
सं ततः पञ्चाशद्धारशक्तिपूर्वकं प्रकृतिक
मठं चैव पीठं बहुर्व्वीतं तथैव च स्वयंभुयमणि
द्वीपं चिन्तामणिगृहं तथा श्मशानं पारिजा
तं वतन्मूलेरत्नवेदिकां तस्योपरिमणिपीठं
माभेत्साधकसत्तमः चतुर्द्दिक्षुतीन देवा
न्शिवान्ब्रह्मशवमुण्डकान् धर्माद्येव अथ
र्म्मोध्वपादगात्रचतुष्टये पादगात्रचतुष्टयं
स्त दक्षांश· दक्षमुरो· दक्षजंघा· दक्षपार्श्व·
नाभि· वामपार्श्वेषु हृदिकन्दं तथापद्मसू·
र्य्यसोमं महेश्वरि वेदस्थानं तथा सत्त्वं रजस्त
वतमस्तथा आत्मानं चैव विमर्शशक्तिं हृ
न्नपद्मके न्यसेत् आत्मानमिति आत्मशब्दे
नामकवचमयमुच्यते शक्तिर्यथा रक्ताङ्गा

पृपा.
१.
२५
25

नाक्रियाचैवकामदा कामदायिनी इतीरितास्त्रि
यानन्दात्तथैवचमनोन्मयी वाग्भवंप्रथमंचो
क्तापराद्येतदनन्तरं अपराद्येहिरूपाद्येल्लेः वा
ग्भमतःपरं सदाशिवमहाप्रेतरुः नेपद्मासनंत
था नमस्स्मेवमंत्रोयंपीठमासमुद्राहृतः एवंपी
ठेदेहमयेचिंतयेदिष्टदेवताम् । अथादौ का
मकलारूपमात्मानंविभाव्य मूलाधारात्कु
ण्डलिनींपरमशिवांतंध्यात्वा तद्धामृतेनसं
सारमकरकच्छपिकपाशुर्ष्मंशृहीत्वा सुषुम्न·
या वाह्यहृदयाष्टदलरक्तपद्ममध्ये ध्यायेत्
तदुक्तं स्वतंत्रे अतःकामकलाध्यानमावाल
कालिकांशिवां कूर्माख्येमुद्रयापुष्पैस्सक्रम
ध्येनिधापयेत् अथकामकलायथा अंविवि
न्दुवदाकारंतदधःकुचयुग्मकं सर्वविद्यामत्ता
हार्द्धसर्ववागीश्वरंपरं सर्वार्थसाधकंदेविस
र्वरंजनकारकं तदधःसपरार्द्धंचस्वपरिष्कृत
मण्डलं सर्वदेवादिभूतांतःसर्वदेवनमस्कृतं
सर्वाह्लादस्सस्मरूर्ति सर्वं घपप्रवर्तकं एतत्
कामकलाध्यानंसर्वगोप्यंसाधकोत्तमैः श्रीक
मेपि यासामधुमती नाम्ना मायामोहनकारिणी

वाह्याभ्यंतरयोगेनचिंतनीयांचतांश्रुणु
त्रैलोक्यमेकरूपेणस्वात्मानमेकरूपिणी प
काकृतिस्वरूपेणसर्वांशांतिंविचिंतयेत्
कामयेत्कामिनींसर्वांदेवींमोक्षस्वरूपिणीं
चिंतयेत्सुंदरींदेवींसर्वव्यापककारिणीं ई
कारःसर्वमंत्रःस्याद्वरःस्याच्चतुष्टयं विन्दु
त्रयस्य देवि शिवश्चमेदेविवक्त्रके विन्दुद्वयंस्त
नद्वन्द्वे हृदिस्थानेनियोजयेत् हकारार्द्धकलां
सूक्ष्मांयोनिमध्येविचिंतयेत् तथाकामकला
रूपांमदनांकुरगोचरे उद्यदादित्यसंकाशांसि
न्दूराभांस्तनद्वये विंदुंसंकल्प्यवक्त्रेतुस्फुर
दीपशिखांप्रिये आधाराद्ब्रह्मरंध्रांतं तंत्रमा
र्गेणभावयेत् कामोविन्दुरहंदेवि तत्रस्थांप
रमेश्वरीं शिवशक्तिमयंदेवि तदधःस्यात्
कुचद्वयं तदधःसपरार्द्धंचविंदुर्यापरमाक
ला सापिकुण्डलिनीशक्तिःकामकलास्वरूपि
णी साशिवावर्णगच्छंतीभित्वाग्रंथिंचतुर्द
श प्रविश्यपरमांगतासूक्ष्ममार्गस्वरूपिणी
सापिचत्रिविधासृष्टिर्ब्रह्मविष्णुस्वरूपिणी सं
विंसाधकश्रेष्ठस्त्रैलोक्यंवशमानयेत् एत

नेकल्पितं देवि कमला ‥ विनिर्णय गोमुखं हि
प्रयत्नेन यदिच्छेदात्मनो हितं अथ कूर्ममुद्राय
था कालिकापुराणे वामहस्तस्य तर्ज्जन्यां द-
क्षिणस्य कनिष्ठिकां तथा दक्षिणतर्ज्जन्यां वामस्या-
ङ्गुष्ठेन योजयेत् प्रोन्नतं दक्षिणाङ्गुष्ठं वामस्य
दक्षिणादिकाः अङ्गुलीर्योजयेत्पृष्ठे दक्षिण-
स्य करस्य च वामस्य पितृतीर्थेन मध्यमाना॥
मिके तथा अधोमुखे च ते कुर्य्यात् दक्षिणस्य
करस्य च कूर्मपृष्ठसमं कुर्य्याद् दक्षिणस्य कर-
स्य च एवंविधः सर्व्वसिद्धिं ददाति पाणिकच्छ-
पः कुर्य्यात्तु नयनाग्रेण निमील्य नयनद्वयं
समं कायशिरोग्रीवं कृत्वा स्थिरतरो बुधः ध्या-
नं समारभेन्मन्त्री सर्व्वपापविनाशनम् ॥
ध्यानं यथा स्वतन्त्रे देव्या ध्यानं प्रवक्ष्यामि सर्व्व
देवोपसेवितं अञ्जनाद्रिनिभां देवीं करालव-
दनां शिवां मुण्डमालावकीर्णांशां मुक्तके-
शीं स्मिताननां महाकालहृदम्भोजे स्थितां पी-
नपयोधरां विपरीतरतासक्तां घोरदंष्ट्रां शिवैः
सह नागयज्ञोपवीतां च चन्द्रार्द्धकृतशेखरां
सर्वालंकारयुक्तां च मुण्डमालाविभूषितां स्व-

मृतहस्तसहस्रैस्तु कांचीवद्धां दिगंबरीं शि
वाकोटिसहस्रैस्तु योगिनीभिर्विराजितां र
क्तपूर्णमुखांभोजां मद्यपानप्रमत्तकां वह्न्य
र्कशशिनेत्रां च वह्निविस्फुरिताननां विग
तासुकिशोराभ्यां कृतकर्णावतंसिनीं कं
ठावशक्तमुण्डालीगलद्रुधिरचर्चितां श्म
शानवह्निमध्यस्थां ब्रह्मकेशववन्दितां स
द्यश्छिन्नशिरःखड्गवराभीतिकरांबुजां त
त्र वामोर्ध्वहस्तेन कपालं तदधः शिरः दक्षि
णोर्ध्वहस्ते अभयं तदधो वरमिति तदुक्तं
महाकालकृतस्तवे ऊर्ध्ववामे कृपाणं कर
कमलतले छिन्नमुण्डं तथाधः सव्ये चा
भीर्वरं चेति ध्यानांतरं यथा भैरवतंत्रे क
रालवदनां घोरां मुक्तकेशीं चतुर्भुजां का
लिकां दक्षिणां दिव्यां मुण्डमालाविभूषितां
सद्यश्छिन्नशिरःखड्गवामाधोर्ध्वकरांबुजां
अभयं वरदं चैव दक्षिणोर्ध्वाधपाणिकां म
हामेघप्रभां श्यामां तथैव च दिगंबरीं कं
ठावशक्तमुण्डालीगलद्रुधिरचर्चितां क
र्णावतंसतांनीतशवयुग्मभयानकां घो

श्यपा.
२.
२७
27

रंदंष्ट्राकरालास्यां पीनोन्नतपयोधरां शवानां
करसंघातैः कृतकांचीं हसन्मुखीं सृक्कद्वय
गलद्रक्तधाराभिः स्फुरिताननां घोररूपां
महारौद्रीं श्मशानालयवासिनीं दंतुरां द
क्षिणव्यापिमुक्तालंबिकचोच्चयां शवरूप
महादेवहृदयोपरिसंस्थितां शिवाभिर्घो
ररावाभिश्चतुर्दिक्षु समन्वितां महाकाले
न च समं विपरीतरतातुरां भजेद्विजगतां
धात्रीं स्मेराननसरोरुहां एवं संचिंतयेत्का
लीं धर्मकामार्थसिद्धिदां अथानयोरेक
तरेण देवीं ध्यात्वा मानसोपचारैराराध्य प
श्चिवज्जपहोमं कृत्वा नमस्कारस्तोत्रपाठं कु
र्यात् । यंत्रनिर्माणार्घपात्राणि यथा
मुण्डमालातंत्रे ताम्रपात्रे कपाले वा श्मशा
नेकाष्ठनिर्मिते शनिभौमदिने वापि शरी
रे मृतसंभवे स्वर्णे रौप्ये ताम्रे लौहे वा चक्रमभ्य
र्चयेत्ततः स्वतंत्रेपि रुप्यं विमस्तदेहः सन्न च
क्रराजं समालिखेत् स्वर्णे रजते ताम्रे पाषा
णे वा स्फटिके तथा इति । अथ बहिः पूजार्थं वस
मानगन्धाष्टकलिखे स्वर्णादिकुण्डगोलस्व

यंभुक्तमुक्तमागुरुलिप्तेवास्वर्णे रजतताम्रशाला
कयाविन्दुकंद्वकेनत्रुष्ठोणवामंत्रमुद्धरन् वि
न्दुमायायुतत्रिकोणंपंचवृत्ताष्टदलपद्मवत्त
रंस्ञ्चतत्तद्वारात्मकं यंत्रराजं लिखेदिति सत्
संप्रदाया वदंति तथाच कालीतंत्रे श्रीदेवि त्रि
कोणं विन्यस्य त्रिकोणं तद्वहिर्न्यसेत् ततो वै
विलिखेन्मंत्री त्रिकोणत्रयमुत्तमं ततो वृ
त्तं समालिख्य लिखेदष्टदलं ततः वृत्तं विलि
ख्य विधिवल्लिखेद्भूपुरयुग्मकं इति मंत्रेऽपि
स्वयंभुकुसुमं मकुण्डगोलोस्थरोचनागुरु
काश्मीरमृगनाभीचजिंकुचचंदनद्वयं प
श्वगन्धः समाख्यातः सर्वदा चण्डिकाप्रियः प
ञ्चेनगन्धयोगेनयोनिचक्रं समालिखेत् यो
निद्वयं ततः कुर्यात् कोणषट्कं ततः प्रिये त
त्तस्याष्टदलं भूमिं चतुर्द्वारैः समन्वितां एत
त्तेकथितं चक्रमत्रपुष्पाञ्जलिं किरेत कुमा
रीकल्पेऽपि श्रीदेवि त्रिकोणं विन्यस्य त्रिको
णं तद्वहिर्न्यसेत् वहिस्त्रिकोणमालिख्य को
णषट्कं लिखेद्वहिः मध्ये तु वैन्दवं चक्रं वी
जमायाविभूषितं षट्कोणात्तु वहिर्वृत्तं त

प्रपा.

१. नोऽष्टदलकं लिखेत् वहिर्वृत्तेन संयुक्तं भूपुरै

२८ केन संयुतं ज्ञात्वैवं मुक्तिमाप्नोति यंत्रराजं न सं

शयः एतत्तु विलिखितामेव कुण्डगोलविलेपि

ते स्वयंभुकुसुमैर्युक्तकुंकुमागुरुसेविते न

नूक्तं पंचदशकोणकषष्ठुक्तं सत्त्वादिति त्र·

विरोधात् नचवाच्यं कालीतंत्रमतमिति त

त्रैव पूजायां षट्कोणपदस्फूर्तेः तद्यथा का

लीकपालिनी कुल्ला कुरुकुल्ला विरोधिनी

विप्रचित्ता तु संपूज्य वहिः षट्कोणके तथा इ

ति वहिः पूजनादानामर्थमेव अतः षट्कोण

भावात् वचनांतरदर्शनाच्च तथा कालीतं

त्रे पंचशक्तिं समालिख्य अथोवक्रोपलद

लं इति कालिकाश्रुतौ च त्रिकोणं त्रिको

णं नवकोणं पद्ममिति कुलसंभवेपि त्रिको

णं विन्यसेत्तत्पश्चात् पुनस्तत्रापि त्रिकोणकं नव

कोणं पुनस्तत्र तन्मध्ये स्थापयेत् शिवां त

स्मात् षट्कोणमत्र शक्त्यात्मकमिति नव

वत्रिकोणं तु यानि गीतं भैरवीचक्रवन्नवको

णमनंतरं स्यात् नैवं तदा तत्रैव पूजायाम

ष्टाविरोधः तद्यथा कुलसंभवे कालीक

कालिंनीकुलाकुलकुलाविरोधिनी विश्व-
चिंतामसैश्चैववह्निः षट्कोणके तु यः उग्रा
सुग्रप्रभा दीप्तां परत्रिकोणके स्मृत नी
लां घनां बलाकां च तथैवापरके त्रिके मा
त्रां मुद्रां मित्रां चैवापरत्रिकोणके तु यः ए
तदुक्तं भवति षट्कोणावरणं तेष्वपरा-
त्रिकोणके त्रयावरणं तथापरत्रिकोण-
त्रयं अपरं त्रयं यजेदित्यस्यार्थो भवत्यन्ते
नत्रिकोणाय त्रनाम्नैव त्रिकोणशब्दस्यैके
वलत्रिकोणात्मके शृंगाटके शक्तित्वात्
नववाच्यत्वयोनेर्वास्य कोणाष्टकस्यैकैक
कोणपदशक्तिरिति तत्रिप्रकारपीठानुपप
त्तेः समग्रचक्रपूजाभावाच्च तस्मान्नवयो-
न्यात्मकमिति भावः वस्तुतस्तु स्वतंत्रादि-
तंत्रभेदात् षट्कोणान्तर्गतत्रित्रिकोणा
त्मकमपि पृथगांतरं भवति यतः षट्कोण
शब्दस्यापरिभाषिके शक्तिरस्त्र लक्षणा
नहि कोऽपि दृष्टपरिकल्पनां विहायादृष्टं
कल्पयति यत्तु कालीतंत्रे षट्कोणमुक्तं
तत्तु तन्मते बोद्धव्यं अस्मत्कल्पे न माना

पुपा॰
२॰

२९ भागान्त नैवेकदेवतमंत्रेयंत्रठयकल्पेनेवि
शेषयइतिवाक्ये नारान्तेत्र एकदेवतमंत्रस्य
विविधयंत्रदर्शनात एतत्तत्रस्याः पूजाप्रा
मग्रेलिखिष्यामः । अथ स्वर्णादिसिंहास
नेप्रतायथोक्तयंत्रंसंस्थाप्य तदुपरिपूज
येद्यथा ॐआधारशक्तयेनमः ॐप्रकृ
त्यैनमः ॐकूर्म्मायनमः ॐअनन्तायनमः
ॐपृथिव्यैनमः ॐसुधाम्बुधये ॐमणि
द्वीपाय ॐचिन्तामणिगृहाय ॐश्मशाना
य ॐपारिजाताय ॐरत्नवेदिकायै ॐम
णिपीठाय दिक्षु ॐनमोदेवेभ्यः पवितः
ॐवटुकांसास्थिमोदमानशिवाभ्यः ॐशव
मुण्डेभ्यः इत्यादिचतुर्दिक्षु ॐधर्म्माय ॐज्ञा
नाय ॐवैराग्याय ॐऐश्वर्य्याय वह्न्यादि
दिक्षु ॐअधर्म्माय ॐअज्ञानाय ॐअवैरा
ग्याय ॐअनैश्वर्य्याय मध्ये ॐअनन्ताय ।
ॐपद्माय अं अर्कमण्डलाय उं सोममण्डला
य मं वह्निमण्डलाय संसत्वाय रं रजसे
तं तमसे आं आत्मने अं अन्तरात्मने पं
परमात्मने ह्रीं ज्ञानात्मने पत्रमूलेषु बी

दितः ओं इच्छायै ओं ज्ञानायै ओं क्रियायै ओं
कामिन्यै ओं कामदायै ओं रत्यै ओं रतिप्रि
यायै ओं आनन्दायै कर्णिकायां ओं मनो
न्मन्यै मध्ये पं परायै पं अपरायै पं परा
परायै ह्सौः सदाशिवमहाप्रेतपद्मासना
य नमः इति पीठपूजां कुर्य्यात नमोन्तेन
सर्वत्र ततः कलशस्थापनं कुर्य्यात तत्र
लक्षणमाह तन्त्रान्तरे कलाकलं गृहीत्वा
तु देवानां विश्वकर्मणा निर्मितो यस्मा
देष तस्मात् कलश उच्यते पद्मपाताच
र्य्या मन्त्रकलाः सर्वत इति कलशः सौवर्णं
राजतं वापि मार्त्तिकं वा यथोदितं त्रिरालये
दस्त्रमन्त्रेण कुंभं सम्यक् सुरेश्वरि इति स्व
तन्त्रे अथ प्रयोगः स्ववामे बिन्दुषट्कोण
वृत्तरेखं कृत्वा सामान्यार्घ्योदकेनाभ्युक्ष्य तत्रा
धारशक्तये नमः इति पूजयेत् ततो नमः
इति क्षालितमाधारं तत्र निधाय मं वह्निमण्ड
लाय दशकलात्मने नमः इति संपूज्य फडि
ति क्षालितं चटं रक्तवस्त्रमाल्यादिभिरलंकृ
तं ओं इति दीवीधृत्वा मण्डलोपरि निधाय यमा

श्या॰
१॰ र्कमण्डलाय द्वादशकलात्मने नम इति संपूज्य
३॰ मूलबीजेन कारणेन ततः संपूज्य स्वरछ्वे उं सो
ममण्डलाय षोडशकलात्मने नम इति द
त्वा फडिति दर्भैर्द्रव्यं संताड्य हुं इमं वरुणं मू
लेन वीक्ष्य नमः इत्यभ्युक्षणं कृत्वा मूलेन ग
न्धमादाय ॐ मितिमन्त्रेण कुम्भे पुष्पं दत्त्वा शा
पमोचनं कुर्यात् ततोर्के स्वतंत्रे ततः स्वका
रणं द्रव्यं समानीय घटे स्थितम् वेष्टितं रक्त
वस्त्रेण रक्तमाल्येन भूषितं वामभागे महे
शानि मण्डलं चतुरस्रकं ततः संस्थापयेः
द्रव्याढ्यं वीतृष्णा वरानने मण्डले कलशे
द्रव्यं वह्न्यर्कशशिमण्डले पूजयेद्दिसर्थः
भावचूडामणौ स्ववामभागे षट्कोणं त
न्मध्ये वर्तुलं त्र्यस्रकं लिखित्वा तत्र कुम्भं वै सो
वर्णं राजतं चैव ताम्रं मृन्मयं वापि यद्वा
लोहविवर्जितं तन्त्रान्तरे आधारं स्थापयेत्
न्मेत्री सौवर्णं वाथ राजतं कांस्यजं मृण्म
यं वापि घटं मत्रेण शालितं सौवर्णं भोगदं
प्रोक्तं राजतं मोक्षदं स्मृतं कांस्यं कान्तिकरं
चैव मृण्मयं पुष्टिदं भवेत् अथ कामश्चशाप

विमोचनं कुर्य्यात् तदुक्तं कुमारीतन्त्रे ब्रह्म
वरुणो देवेशि यथापानादिकर्म्माणि दोषान
जायते देवि तान्येव मंत्रान्शृणुप्रिये एकमेव
परंब्रह्म स्थूलसूक्ष्ममयंध्रुवं कचोद्भवांब्रह्म
हत्यांतेन तेनाशयाम्यहं सूर्य्यमण्डलसम्भू
तवरुणमण्डलसम्भवे अमावीजमये देवि
शुक्रशापाद्विमुच्यतां देवानां प्रणवो वीजं
ब्रह्मानन्दमयं यदि तेन सत्येन देवेशि ब्रह्म
हत्यां व्यपोहतु एवं मन्त्रत्रयेणैव अभिमन्त्र
णं शुभं प्रदद्यात् कालिकायै च ततो नै
वेद्यं भुग्भवेत् इति मंत्रत्रयं पठ्वोपरि विक्षिपे
त् ॐ शां शीं शूं शैं शौं शः ब्रह्मशापविमोचितायै
सुधादेव्यै नमः इति ब्रह्मशापविमोचनं द्व
योपरि दशधा जपेत् ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं
क्रः सुराकृष्णशापं विमोचय अमृतं स्रावय
स्रावय स्वाहा इति कृष्णशापविमोचनं दश
धा जपेत् यथोत्तरतन्त्रे हंसः शुचिषद्वसुरं
तरीक्षसद्धोता वेदिषद् अतिथिर्दुरोणसत्
नृषद्वरसदृतसद् व्योमसदब्जा गोजा ऋतजा
अद्रिजा ऋतं बृहत् इति वारवारत्रयं पठ

पूपा. २. ३१
31

अमृताभिंमसतदुपरि आनन्दभैरवं ध्यायेत् य
था सूर्यकोटिप्रतिकाशं चन्द्रकोटिसुशीतलं
अष्टादशभुजैर्युक्तं पंचवक्त्रं त्रिलोचनं अमृ
प्रमन्त्रामन्त्रमपिसकृत्तकालिसन्ततंगजानूके
यातिक्ष्वितिपरिवृढः सकृविवरः १६ स्वपु
ष्पाराकीर्णाक्रमस्तमथयनुषोमन्दिरमहोपूरो।
ध्यायन्ध्यायन्यदिजपतिमातस्तवमन्त्रं
सगान्धर्वश्रेणीपतिरिवकवित्वामृतनदी।
नदीनः पर्य्यन्ते परमपदलीनः प्रभवति १७
त्रिपंचारे पीठे शवशिवहृदि स्मेरवदनां म
हाकालेनोच्चैर्मदनरसलावण्यनिरताम्
सम्यासक्तो नक्तं स्वयमपिरतानन्दनिरतो न
रोयोध्यायेत्त्वां भवजननिसस्यात्स्मरहरः १८
सलोमास्थिस्वैरं पललमपिमार्जारमपिते
परंचौष्ट्रंमैषंनरमहिषयोश्छागमपिवा
वलिंतेपूजायामयिविरलवक्केवितरतांसतो
सिद्धिः सर्वाप्रतिपदमपूर्वाप्रभवति १९ व

पुपा·
१· श्रीमंत्रं लक्षं प्रजपति हविष्याशनरतो दिवा सा
५९ न्तश्चेमच्चरणयुगलध्याननिरतः परं नक्तं नग्नो
निधुवनविनोदेन च मनुं जपेल्लक्षं सम्यग्जातस्म
59 रहरसदृशः क्षितितले २१ इदं स्तोत्रं मातस्त
व मनुसमुद्धारणजनुः स्वरूपाख्यं पादाम्बुजयु
गलपूजाविधियुतं निशार्द्धे वा पूजासमयम
थवा यस्तु पठति प्रलापस्तस्यापि प्रसरति क
वित्वामृतरसः २१ कुरंगाक्षीवृन्दं तमनुसर
ति प्रेमतरलं वशस्तस्य क्षोणीपतिरपि कुबेर
प्रतिनिधिः रिपुः कारागारं कलयति च तं के
लिकलया चिरंजीवन्मुक्तः प्रभवति स भ
क्तः प्रतिजनुः २२ इति महाकालविरचितं
स्वरूपाख्यं स्तोत्रं समाप्तम ॥
अथो भैरवतन्त्रे कवचं लिख्यते कैलासशिख
रारूढं भैरवं चन्द्रशेखरं वक्षःस्थले समासी
ना भैरवी परिपृच्छति भैरव उवाच देवेश
परमेशान लोकानुग्रहकारक कवचं सू
चितं पूर्वं किमर्थं न प्रकाशितं यदि मे महती
प्रीतिस्तवास्ति कुलभैरव कवचं कालिका
देव्याः कथयस्वानुकंपया श्रीभैरव उवाच

अप्रकाश्यमिदं देवि नरलोके विशेषतः लब्ध
वारं कारितास्मि स्त्रीस्वभावाद्धि ईश्वरासि देवदेवा
व भैरवकावहेतोनाथ कुलधर्मपरायणः
यतस्त्वत्प्रकृज्जीवाम्याशावोपरि चित्तोपरि ते
षां प्रयोगासिद्ध्यर्थं संसारतार्थविशेषतः ईश्व
सि वरूशो देवकथयस्व दयानिधे भैरवउवा
च कथयामि शृणु प्राज्ञे कालिकाकवचं परं
गोपनीयं पशोरग्रे स्वयोनिरपरे यथा सर्व
विद्यामहाराज्ञी सर्वदेवनमस्कृता कालि
काकवचस्य भैरवऋषिरुष्णिक छन्दः श्म
शानरूपिणी श्रीदक्षिणकालिका देवता ह्रीं
बीजं ॐ शक्तिः क्रीं कीलकं सर्वार्थसाध
नपरः सर्वमन्त्रसिद्धौ विनियोगः सहस्रारे
महापद्मे कर्पूरधवलो गुरुः वामोरुस्थित
तच्छक्तिः सदा सर्वत्र रक्षतु परमेशः परः
पातु परापरगुरुस्तथा परमेष्ठीगुरुः पा
तु दिव्यसिद्धिश्च मानवः महादेवी सदा पा
तु महादेवस्सदावतु त्रिपुरो भैरवः पातु
दिव्यरूपधरः सदा ब्रह्मानन्दः सदा पातु
श्णादेवः सदावतु चलचित्तः सदा पातु

चैलांवलश्चपातुमां कुमारः क्रोधनश्चैववर
टःस्मरदीपनः मायामायावतीचैवसिद्धौघाः
पांतुसर्वदा विमलःकुशलश्चैवभीमसेनः
सुधाकरः मीनोगोरक्षकश्चैवभोजदेवःप्र
जापतिः कुलदेवोरंतिदेवोविघ्नेश्वरहुताश
नः संतोषःसमयानन्दःपातुमांमानवाःसदा
सर्वेऽप्यानन्दनाथांताः अंबांतामातरःक्रमा
त् गणनाथःसदापातुभैरवःपातुमांसदा
वटुकोणःसदापातुदुर्गामांपरिरक्षतु शिर
सःपादपर्यंतंपातुमांघोरदक्षिणात् तथा
शिरसिमांकालीहृदिमूलेचरक्षतु संपूर्ण
विद्ययादेवीसदासर्वत्ररक्षतु क्रींक्रींक्रींवट
वेपातुहृदिकूंकूंसदावतु ह्रींह्रींपातुसदा
धारेदक्षिणेकालिकेहृदि क्रींक्रींक्रींपातुमे
पूर्वेहूंहूंदक्षेसमावतु ह्रूंह्रूंमांपश्चिमेपा
तुहूंहूंपातुसदोत्तरे ष्टुष्टुपातुसदास्वाहामू
लासर्वत्ररक्षतु षडंगयुवतीपातुषडंगोऽ
स्मरेवमां मंत्रराजःसदापातुऊर्ध्वोधोदिग्वि
दिक्स्थितः चक्रराजःस्थितास्त्रापिदेवताः
परिपांतुमां उग्राउग्रप्रभादीप्तापातुपूर्वेत्रि

कोणके नीलाञ्जनावलाका च तथापरत्रिको
णके मात्रासुद्रामिता चैव तथा मध्यत्रिकोणके
कालीकपालिनी कुल्ला कुरुकुल्ला विरोधिनी
बहिः षट्कोणके पान्तु विप्रचित्ता तथा प्रिये
सर्वाः श्यामाः खड्गधरा वामहस्ते च तर्जनाः
ब्राह्मी पूर्वदले पातु नारायणी तथाग्निके
माहेश्वरी दक्षदले चामुण्डा राक्षसे ऽवतु को
मारी पश्चिमे पातु वायवे चापराजिता वारा
ही चोत्तरे पातु नारसिंही शिवे ऽवतु ऐं ह्रीं अ
सितांगः पूर्वे भैरवः परिरक्षतु ऐं ह्रीं चण्डस्तु
दक्षिणे ऐं ह्रीं क्रोधो नैरृते ऽवतु ऐं ह्रीं उन्म
त्तकस्तथा पश्चिमे ऐं ह्रीं मां कपाली वायुको
णके ऐं ह्रीं भीषणश्चोत्तरे ऽवतु भैरवः
ऐं ह्रीं संहार ऐशान्यां माहृणोमकगाः शिवाः
ऐं हेतुको वटुकः पूर्वदले पातु सदैव मां ऐं त्रि
पुरान्तको वटुकश्चाग्नेय्यां सर्वदा ऽवतु ऐं अ
ग्निजिह्व वटुको ऽव्यात् नैरृत्यां पश्चिमे तथा
ऐं कालवटुकः पातु ऐं करालवटुकस्तथा वा
यव्यां ऐं एकः पातु उत्तरे वटुको ऽवतु ऐं भीम
वटुकः पातु ऐशान्यां दिशि मां सदा ऐं ह्रीं ह्रीं

ए॰पा॰
१॰
८१

61

ॐ फट् स्वाहान्ताश्चतुःषष्टिमातरः ॐ ह्रीं योद-
नयामां ग्रहष्टदेशे तु पान्तु मां ऐं क्रूं सिंहव्या-
घ्रमुखी शैर्षं मां परिरक्षतु ऐं क्रां क्रीं सर्पम-
मुखी आग्नेयकोणे सदाऽवतु ऐं म्रां म्रां मृगमे-
षमुखी दक्षिणे मां सदाऽवतु ऐं चैं चैं ग-
जराजमुखी नैरृत्ये मां सदाऽवतु ऐं मं मं वि-
डालमुखी पश्चिमे पातु मां सदा ऐं खौं खौं
क्रोष्टुमुखी वायुकोणे सदाऽवतु ऐं ह्रां ह्रां ह्रू-
स्वदीर्घमुखी नवोदरमहोदरी पातु मामुत्तरे
कोणे ऐं ह्रीं ह्रीं शिवकोणके ह्रस्वजंघतालजं-
घप्रलंबौष्ठी सदाऽवतु एताः श्मशानवासि-
न्यो भीषणा विकृताननाः पातु मां सर्वदा दे-
वः सायकाभीष्टदारिका ॐ क्लीं मां पूर्वतोऽव-
तु देवाग्नेयामग्निदेवता दक्षे यमः सदा पातु नै-
रृत्यां नैरृतिश्च मां वरुणोऽवतु मां पश्चात्
वायुर्मां वायवेऽवतु कुबेरश्चोत्तरे पायादै-
शान्यां तु सदाशिवः ॐ ऊर्ध्वं ब्रह्मा सदा पातु अध-
श्चानन्तदेवता पूर्वादिदिक्स्थिताः पान्तु वज्रा-
द्यायुधाश्च मां कालिकाऽवतु शिरसि हृद-
ये कालिकाऽवतु आधारे कालिका पातु पाद-

यो: कालिकाऽवतु दिक्षु मां कालिकापातु वि
दिक्षु कालिकाऽवतु ऊर्ध्वे मे कालिकापातु अ
धश्च कालिकाऽवतु चर्म्मासृङ्मांसमेदोऽ
स्थिमज्जाशुक्राणि मेऽवतु इन्द्रियाणि मनश्चै
व देहं सिद्धिश्च मेऽवतु आकेशात्पादपर्य्य
न्तं कालिका मे सदाऽवतु विपत्ति कालिकापा
तु पथि मां कालिकाऽवतु शयने कालिका
पातु सर्वकार्येषु कालिका पुत्रान्मे कालि
कापातु धनं मे पातु कालिका यत्र मे संशया
विष्टा स्तान्नश्यन्तु शिवाज्ञया इतीदं कवचं देवि
ब्रह्मलोकेऽपि दुर्ल्लभं तव प्रीत्या मया ख्यातं गो
पनीयं स्वयोनिवत् तव नाम्नि स्मृते देवि सर्व्वय
ज्ञफलं लभेत सर्व्वपापः क्षयं याति वाञ्छा सर्व्वा
त्र सिद्ध्यति नाम्नः शतगुणं स्तोत्रं ध्यानं तस्मात्
शताधिकं तस्मात् शताधिको मन्त्रः कवचं त
च्छताधिकं शुचिः समाहितो भूत्वा भक्ति श्रद्धा
समन्वितः संस्थाप्य वामभागे तु शक्तिं स्वामि
परायणां रक्तवस्त्रपरीधानां शिवमन्त्रधरां शु
भां या शक्तिः सा महादेवी हररूपश्च साधकः
अन्योऽन्यचिन्तनाद्देवि देवत्वमुपजायते शक्ति

प्रपा॰
१॰
६२

62

युक्तोयजेत्देवींचक्रेवामनसापिवा भोगेश्वम
युपकाद्येस्तांश्लेष्मस्ववासितेः ततस्तुकव॰
चमिदंपठेदेकमनाःप्रिये तस्यसर्वार्थसिद्धिः
स्यान्नात्रकार्याविचारणा इदंरहस्यंपरमंपरं
स्वस्त्ययनंमहत् यःसकृत्तुपठेद्देविश्राणयाद्या
समाहितः सर्वान्नीन्लभतेकामान्परेदेवीपु
रंव्रजेत् सकृद्यस्तुपठेद्देविकवचंदेवदुर्लभं
सर्वयज्ञफलंतस्यभवेद्देवनसंशयः संग्रामे
वर्यजेत्शत्रून्मातंगानिवकेशरी नास्त्राणि
तस्यशस्त्राणिशरीरेप्रभवंतिच तस्यव्याधिः
कदाचिद्दुःखंनास्तिकदाचन गतिस्तस्यैवस
र्वत्रवायुतुल्यःसदाभवेत् दीर्घायुःकामभो
गीश्चगुरुभक्तःसदाभवेत् श्लोकवर्ममाहा
त्म्यपठमानस्यनिस्पृशः विनापिनयथायोगेन।
योगीशःसमतांव्रजेत् भूर्ज्जेवाचिरसमालिख्य
चक्रंतत्रविनिर्मितं मध्यत्रिकोणेसंलिख्य
साध्यसाधकयोर्लिपिं उद्धरेन्मूलमंत्रंचमा
तृकार्णेनवेष्टयेत् लक्षमिश्रेणाचन्द्रणेनच॰
न्दनाभ्यांस्वरेष्वपि यत्नंतंत्रमहेशानिस्वरा
स्वरसुदुर्लभं गोरोचनाकुंकुमाभ्यांतद्वत्तले

कवचं लिखेत् श्वेतसूत्रेण संवेष्ट्यालक्तया।
परिमण्डयेत् पंचामृतैः पञ्चगव्यैः स्नापयित्वा
शुभेऽहनि संपूज्य देवतारूपं गुटिकां सर्वका
मदां प्राणप्रतिष्ठामन्त्रेण प्राणांस्तत्र नियोजये
त् अन्तर्योनिं ततो धूपं दत्वा तत्र संस्थापयेद्बुधः
प्रभाते गुटिकां देवि कण्ठलग्नां बलप्रदा
शीर्षे वश्यकरी देवी नाभौ स्तंभनकारिणी
वक्षो वामभुजे शेषा वैरिपक्षक्षयंकरी जठ
रे रोगहरणी पुत्रदा हृदि संस्थिता विद्याकरी
ललाटस्था शिखायां तु यशःप्रदा सर्वका
मप्रदा देवी सर्वरोगक्षयंकरी दक्षिणे बाहु
मूले वै यदि तिष्ठति सर्वदा तदा सर्वार्थसिद्धिः
स्याद्यद्यन्मनसि वर्तते महत्कवचस्या
स्य पठनाद्धारणात् प्रिये सर्वान्कामानवा
प्नोति नवरत्नहात्प्रकाशितं गुरोः पादप्रसा
देन संसिद्धिर्या यदि लभ्यते तथैव कवचं देवि।
नाजप्त्वा गुरुपादुकां तत्फलं नाशमाप्नो।
ति पैरे नरकमाप्नुयात् सत्यं सत्यं पुनः सत्यं।
सत्यं सत्यं पुनः पुनः न शक्नोमि प्रभावं तु क
वचस्यास्य वर्णितुं यस्मै कस्मै प्रदातव्यं कव

वचमेतद्दुर्लभं नदेयंपरशिष्येभ्यः कृपणेभ्यः
सुरेश्वरि शिष्यायभक्तियुक्तायसेवकायतत
थैवच गुरुभक्तिविहीनायपरदाररतायच
निन्दकायकुलीनायदंभिकायचसुन्दरि
योददातिनिषिद्धेभ्यः कवचंममसुव्रते तत्क्षतं
तस्यनश्यंतिदेवेशि आयुःकीर्तियशःश्रियः न
हिंसंतिसदादेवियोगिन्योमातृमण्डलात् परे
नरकमाप्नोतिजन्मकोटिशतानिच देयंशि
ष्यायशान्तायगुरुभक्तिपरायच सर्वलक्ष
णयुक्तायतन्मन्त्रयुतायच इत्युत्तरतंत्रे का
लीप्रस्तावेकालीभैरवसंवादेश्रीमद्दक्षिण
कालिकाकवचंसंपूर्णम् शुभमस्तु ॥
विरूपाक्ष उवाच नमामिगुरुमव्योमं मंत्र।
शक्तिसमन्विमं प्रसन्नंज्ञानमज्ञानंदेहेतेतु
द्विप्रकाशकं गजेन्द्रवदनंनौमिरक्तंविघ्नवि
दारकं पाशांकुशवराभीतिलसद्भुजचतुष्ट
यं भैरवःसर्वदापातुऋषिर्मेशिरसापरि सु
छन्दःसदापातुतत्त्वरूपंचविनयात्मकं गुण
त्रयमयीशक्तिःपरशक्तिस्तुईडिता ब्रह्मस्व
रूपिणीपातुहृदयेममकालिका बीजस्वरू

पिणी पातु क्रीं कारी शक्तिरूपिणी हूं शक्तिः स
र्वदा पातु सर्वरत्नस्वरूपिणी महाकालः सदा
पातु महाभीमपराक्रमः ददातु मम कामानि
सर्वसिद्धीश्वरो यतः आदिलृवर्णपर्यन्ताः
हृदये मम मातृकाः पञ्चान्ते ङादिवान्ताश्च र
क्षन्तु वा हृद्युग्मके नममध्यगता वर्णा मा
दिक्षान्तास्तथैव च सविन्दवः सदा पातु नेत्र
द्वयोर्हृदयोर्मम भूतप्रेतपिशाचाद्य विघ्नदे
हास्तथापरेः स्वप्रभावाः सममध्याश्च वर्णा
रक्षन्तु मां सदा मम लोमकूपेषु मर्मस्थाने
षु सन्धिषु नाडीयातु विकारेभ्यो रक्षन्तु मम
मातृकाः शक्तिराधाररूपा या सा पातु परमे
श्वरी अवर्णः सर्वदा पातु सर्वदेवमयः स्वयं
फणागणावलिः पातु समुद्रः पातु मां सदा र
त्नद्वीपः सदा पातु रक्षन्तु कल्पपादपाः श्म
शानपीठकः पातु पातु मां मानवेदिका सदा
शिवमहाप्रेतशवो मां परिरक्षतु द्वारदेशे
द्वारपाला योगिनः पातु मां सदा सिद्धयोऽष्टौ
सदा पान्तु ब्राह्म्यादिवसुदिग्गताः काली क
पालिनी कुल्ला कुरुकुल्ला तथैव च विरोधि

पुरा॰
२॰
६४
64

नींविघ्नविनांनमामि सर्वसिद्धये एतास्तुवशायो
गिन्योबहिःषट्कोणकेस्थिताः रक्षंतुमांसदा
देव्योमातरोभक्तवत्सलाः उग्रामुग्रप्रभांदी
प्तांनमाम्यात्मविभूतये सर्वसिद्धिंप्रयच्छंतु
पान्तुमांपुत्रवत्सदा नीलांघनांबलाकांचप्र
णमामिसमुन्नकः सर्वविज्ञानसम्पत्स्या॰
र्थ्यंरक्षंतुकलुषाणिवात् मात्रामुद्रामितानं
वनमामिचरणांबुजं देवीप्रमसवीनांचश
रण्यामिसिद्धये एताःपंचदशकोणकेका
वरदासदा तन्नेनीवामहस्तेनखड्गंदक्षिणपा
णिना मुण्डमालाधराःशीर्षेनीलांजनचं
योपमाः शत्रुभ्यःसिद्धिदाश्चण्डाःपान्तुमांका
लिकाप्रियाः बहिःपद्मदलेतेतुब्रह्माण्या।
द्यष्टशक्तयः रक्षंतुमेप्रयच्छंतुमेप्रयच्छंतु
सर्वसिद्धिंदयान्विता ब्रह्माणीपातुमांपूर्वे
सर्वाःशिववरप्रदाः वह्नौनारायणीपातुस
र्वकामार्थसिद्धिदा माहेशीदक्षिणेपातुस
र्वमंगलकारिणी चामुण्डानैर्ऋतेपातुस
र्वशत्रुप्रमर्दिनी कौमारीपश्चिमेपातुशक्ति
हस्ताविमर्दिनी अपराजिताचवायव्यांपा॰

त्वं मां जयदा शुभा उत्तरे पातकाराही वरदा घो
ररूपिणी नारसिंही सदा पातु पेशा सां भय
नाशिनी एतास्त्वपरविद्याद्याः शक्तयस्त्वाष्ट
देवताः ब्रह्मविष्णुशिवाद्यैर्नैतज्ञोभिन्नाः
कलेवरा सूर्येन्दुवह्निपीठे तैवेन्द्वपरमे
श्वरी नमामि दक्षिणामूर्तिकालिकां परमे
श्वरीं भिन्नांजनचयप्रख्यां प्रवीनशवसंस्थि
तां गलच्छोणितधाराभिः स्मेराननसरो
रुहां पीनोन्नतकुचद्वन्द्वपीनवक्षोनितम्बि
नीं दक्षिणोर्ध्वकेशान्तां दिगंबरविनोदिनीं
महाकालसमाविष्टां स्मेरानन्दोपरिस्थितां
सुखप्रसन्नस्मितां मोदमोदिनीं मदविह्वलां
आरक्तमुखप्रसन्नादिनेत्रलीभिर्विराजितां
शवहृदयकृतांतंसां सिन्दूरतिलकोज्वलां
पंचाशन्मूर्तिघटितमालांशोणितलोहितां
नानामणिविशोभाढ्यां नानालंकारशोभितां
शवास्थिकृतकेयूरशंखकंकणमण्डितां
शववक्षःसमारूढां लेलिहानां शवं कचित
शवमांसं कृतग्रासां साट्टहासां मुहुर्मुहुः
खड्गमुण्डयुतां वामे सव्येऽभयवरप्रदां दन्त

प्रपा॰
२॰
६५
65

रांवमहारौद्रींचण्डनादातिभीषणां शिवाभिः
घोररावाभिर्वेष्टितांभयनाशिनीं माभैर्माभैः
स्वभक्तेषुजल्पन्तींघोरनिस्वने यूयंकिमिच्छ
थयुष्मद्ददामीतिप्रभाषिणीं त्वंगतिःशरणं
देवित्वंमातापरमेश्वरि पाहिमांकरुणासा
गरेनमस्तेपरमेश्वरीं नमस्तेकालिकेदेवीनम
स्तेभक्तवत्सले मृत्विताहरमेदेविप्रतिभाप्र
तिदायिके गद्यपद्यमयींवाणींतर्कव्याकर
णादिकौ ग्रन्थीनगतांविद्यांदेहिदक्षिणका
लिके जयंदेहिसभामध्येधनंदेहिधनागमे
देहिमेचिरजीवित्वंकालिकेरक्षदक्षिणे रा
ज्यंदेहियशोदेहिपुत्रान्दारान्धनंतथा देहा
न्तेदेहिमेमुक्तिंजगन्मातर्नमोऽस्तुते मंगला
भैरवीदुर्गाकालिकात्रिदशेश्वरी उमाहैम
वतीकन्याकल्याणीभैरवेश्वरी कालीब्राह्मी
चमाहेश्वरीकौमारीमधुसूदनी वाराहीवा
सनीचण्डात्वंजयशुम्भनिशुम्भहा उग्रतारेति
तारेतिशिवेत्येकजटेतिच लोकोत्तरेतिवाले
तिगीयतेकृतिभिःसदा यथाकालीतथातारा
तथाछिन्नाचउल्लुका एकमूर्त्तिस्त्वभिन्ना

देवि त्वं कालिका परा प्रकृतिश्च विद्या देवि
कोटियानन्तरूपिणी । अंगांगकेनामभेदैः का
लिके निरूप्यते शंभुः पञ्चमुखेनैव गुणा
न् वक्तुं क्षमो न ते चापल्यात् कृतं सर्वं क्षम
स्व शुभदा भव प्राणान् रक्ष यशो रक्ष पुत्रदा
रधनं तथा सर्वकाले सर्वदेशे पाहि देवि
कालिके यः संपूज्य पठेन्नित्यं दिवा वा सन्ध्य
योस्तथा अथवा ध्यायन् महानीशः सर्वकामं
स्ततो लभेत् यद्यत्प्रार्थयते चित्ते तत्तदाप्नो
ति कालिकाकथा स्वयं लक्ष्मीर्वसेद्देहे मुक्तिः कर
गता पुनः इति रुद्रयामले उत्तरतंत्रे दक्षि
णकालिकाकवचं समाप्तम् शुभम्
अथ स्तोत्रम् महाकालभैरव उवाच स्तवरा
जं हृष्णराम सर्वकालमनोहरं यस्य स्मरण
मात्रेण कालिका संप्रसीदति यद्भक्तस्त्वय
देवास्मिन् संवत्सरमुद्रवः गोपनीयं प्रयत्ने
न पठनीयं परात्परं कालीस्तोत्रं मम प्रियः
कस्मैचिन्न प्रकाशितं कथ्यते त्वद्भक्तिरोधे
न सर्वपापप्रणाशनं हृष्णराम हृष्णराम
हृष्णराम स देवर्हि गोपनीयं गोपनीयं गो

श्या·
२·
५८
66

पनीयंनसंशयः गणराजेश्वरक्लेकेशोनग्नः
शक्तिसंसंगतः रक्तचन्दनसिन्दूरैस्तथान्यै
रुपचारकैः मनसाभासमस्तोद्यैश्चतांबूले
श्चविशेषतः पूजयित्वामहाकालीमहाका
लरतांतथा तीर्थपानंविधाययोऽतांबूलभ
दयेन्नतः भगलिंगामृतेमध्येनिवेदयेत्तत्र
साधकः जपित्वाचमहामंत्रंकालीरूपम
नोहरं मनसाचिन्तयेत्कालीपदनस्तोत्र
न्तुसाधकः रक्षोयक्षपिशाचेभ्योनिसंसः
न्ताकरंपरं प्रसन्नाकालिकातस्यपुत्रत्वे
नानुकंपते दक्षिणेकालिकेमातर्मुण्ड
मालाविभूषिते भक्तत्राणाय्यचित्तेयम
जाड्यविनाशाय ज्वलच्चितान्निमध्यस्थेपरि
वारसमन्विते त्वत्पदांभोजमापन्नेरक्ष
मांपुत्रवत्सदा महामेघच्छविश्यामेमुक्त
केशिचतुर्भुजे पाणिडिमंककवितांचैवमहे
देहिमहेश्वरि वामोर्द्धेच महारवेद्रंविधारः
यस्मिंशंकरि अधोलस्थित्रमुण्डेममविघ्न
विनाशाय अभयंदक्षिणेचोर्द्धे तथाद्यः पा
णिनावरं कंठसंसक्तमुण्डालिमहाकालि

नमोऽस्तु ते सततं त्वत्स्वरूपं ये स्मरंति साध
कोत्तमाः तेषां समस्तशाहिभुगतिरख्या हन्ता
सदा चिन्तयामि वतन्त्रामरत्नमां सर्वतः स
दा दिगंबरीं करालास्यां घोरदंष्ट्रां भयानकां
कर्णमूले शवयुग्मां स्थूलतुंगपयोधरां
महारौद्रीं महाघोरां श्मशानालयवासिनीं
शवपाणिसमूहैश्च कृतकांचीं हसन्मुखीं
ओष्ठप्रान्तगलद्रक्तधाराविस्फुरिताननां
मुण्डालीसंस्रवद्रक्तैः सर्वांगे चारुचर्चितां
शिवाभिर्घोररावाभिस्सुतर्दिक्षु समन्वितां
प्रज्ञाकाले पठेद्यस्तु सद्भावफलको ध्रुवः
स भवेत् कालिकापुत्र इति ख्यातिमुपागतः
रजस्वलाभगं पश्यन् जपेत्कालीमहामनुं
स्तवेनानेन संस्तुत्य साधकः किं न साधयेत्
श्मशाने नरशान्ते जप्त्वा योनिमामंत्र्य मंत्रवित्
संगमस्य पदस्नादस्य सर्वविदीश्वरो भवेत्
मातेव दक्षिणा तस्य सर्वत्र हितकारिणी
तस्य देहे सदा काली वसेद्गामनसंशयः
रजोजपविहीनाय स्त्रीमहानिन्दकाय च
वामार्गस्य वहस्याय गुरुभक्ताय सर्व[illegible]

पृ.
२. एवंमस्मप्रयत्नेनस्तवमेनेनदर्शयेत प्रसादाद
९० शीनाह्रापितस्यासिद्धिर्भवेन्नहि इतिकालिका
परमारहस्येकालीहृदयेमहाकालभैरवपार्
वतीसंवादेश्रीदक्षिणकालिकास्तवःसमाप्तः
तंत्रांतरोक्तकवचं भैरवउवाच कालिकाया
महाविद्याकथिताभुविदुर्लभा तथापिहृदये
शल्यमस्तिदेविकृपांकुरु कवचंतुमहादेवि
कथयस्वानुकंपया यदिनोकथ्यतेमातर्वि
मुंचामितदातनुं देव्युवाच शंकापिजायते
वत्सतवस्नेहात्प्रकाश्यते नवक्तव्यंनद्रष्ट
व्यमतिगुह्यतरंमहत् कालिकाजगतांमा
ताशोकदुःखविनाशिनी विशेषतःकलियु
गेमहापातकहारिणी कालीमेपूर्वतःपातु
पृष्ठतश्चकपालिनी कुल्लामेदक्षिणेपातुकु
रुकुल्लातथोत्तरे विरोधिनीशिरःपातुविप्र
चित्ताचचक्षुषि उग्रामेनासिकांपातुकर्णौ
चोग्रप्रभातथा वदनंपातुमेदीप्तानीलाच
चिबुकंतथा घनाग्रीवांसदापातुबलाकाबा
हुयुग्मकं मात्रापातुकरद्वंद्वंवक्षोमुद्रासदा
वतु मितापातुस्तनद्वंद्वंयोनिमंडलदेवता:

ब्राह्मी मे जठरं पातु नाभिं नारायणी तथा । ऊ-
रू माहेश्वरी पातु चामुण्डा पातु लिङ्गकं । कौमा-
री च कटिं पातु जङ्घायुग्मं तथैव च । अपराजिता
च पादौ मे वाराही पातु चाङ्गुलीः । सन्धिस्थानं
नारसिंही पत्रस्था देवतास्तथा । रक्षाहीनं तु
यत्स्थानं वर्जितं कवचेन तु । तत्सर्वं रक्ष मे दे-
वि कालिके घोरदक्षिणे । ऊर्ध्वमधस्तथा दिक्षु
पातु देवी स्वयं वपुः । हिंस्रेभ्यः सर्वदा पातु सा-
धकं च जलाधिकात् । दक्षिणाकालिका देवी
व्यापकं मे सदावतु । इदं कवचमज्ञात्वा यो भ-
जेद्देवीं दक्षिणां । न पूजाफलमाप्नोति वि-
घ्नस्तस्य पदे पदे । कवचेनावृतो नित्यं यत्र तत्रै-
व गच्छति । तत्र तत्राभयं तस्य न क्षोभं विद्यते
क्वचित् । इति दक्षिणकालिकाकवचं समाप्तं ।
अथ सहस्रनामस्तोत्रम् । श्रीशिव उवाच
कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः ।
यामासाद्य मया प्राप्तमैश्वर्यपदमुत्तमं । संयु-
क्तः परया भक्त्या यथोक्तविधिना भवान् । कु-
रुतामर्चनं देव्याः त्रैलोक्यविजिगीषया । श्री
राम उवाच । प्रसन्नो यदि मे देव परमेश पुरातन

पुरा॰
२॰
९८
68

रहस्यं परमं देव्याः कृपया कथय प्रभो ॥ विनार्च्च
नं विना होमं विना न्यासं विना बलिं विना गंधं
विना पुष्पं विना नित्योदितां क्रियां प्राणायामं
विना ध्यानं विना भूतविशोधनं विना दानं
विना जापं येन काली प्रसीदति ॥ शिव उवा
च ॥ पृष्टं त्वयोत्तमं प्राज्ञ भृगुवंशसमुद्भव ॥ भ
क्तानामपि भक्तोऽसि त्वमेव साधयिष्यसि
देवीं दानवकोटिघ्नीं लीलया रुधिरप्रियां
सदा स्तोत्रप्रियामुग्रां कामकौतुकलालसां
सर्वदानन्दहृदयामासवोत्सवमानसां ॥ मा
ध्वीकमत्स्यमांसादिरागिणीं वैष्णवीं परां
श्मशानवासिनीं प्रेतगणनृत्यमहोत्सवां
योगप्रभावां योगेशीं योगीन्द्रहृदयस्थितां
तामुग्रकालिकां राम प्रसादयितुमर्हसि ॥ त
स्याः स्तोत्रं परं पुण्यं स्वयं काल्या प्रकाशितं ॥ त
व तत्कथयिष्यामि श्रुत्वा वत्सावधारय ॥ गो
पनीयं प्रयत्नेन पठनीयं परात्परं ॥ यस्यैक
कालपठनात्सर्वे विघ्नाः समाकुलाः ॥ नश्य
न्ति दहने दीपपतंगा इव सर्वतः ॥ गद्यपद्यम
यी वाणी तस्य गंगाप्रवाहवत् ॥ तस्य दर्शन

मात्रेण वादिनो निष्प्रभां गताः तस्य हस्ते सदे
वाल्लि सर्वसिद्धिर्गंसशायः राजानोऽपि च दास
त्वं भजंते किं परे जनाः निशीथे मुक्तकेशस्तु
नग्नः शक्तिसमाहितः मनसा चिन्तयेत्कालीं
महाकालेन लालितां पठेत्सहस्रनामाख्यं
स्तोत्रं मोक्षस्य साधनं प्रसन्ना कालिका तस्य
पुत्रत्वेनानुकंपते यथा ब्रह्मामृतैर्ब्रह्मकु
सुमैः पूजिता परा प्रसीदति तथानेन स्तुता
काली प्रसीदति अस्य श्रीदक्षिणकालिकास
हस्रनामस्तोत्रस्य महाकालभैरव ऋषिरु
ष्णिक्छन्दः श्मशानकाली देवता धर्मार्थका
ममोक्षार्थे विनियोगः ॐ श्मशानकालिका
काली भद्रकाली कपालिनी गुह्यकाली म
हाकाली कुरुकुल्ला विरोधिनी कालिका का
लरात्रिश्च महाकालनितंबिनी कालभैरव
भार्या च कुलवर्त्मप्रकाशिनी कामदा का
मिनी कन्या कमनीयस्वरूपिणी कस्तूरीर
सलिप्तांगी कुंजरेश्वरगामिनी ककारवर्ण
सर्वांगी कामिनी कामसुन्दरी कामार्ता का
मरूपा च कामधेनुः कलावती कांता कामस्व

रूपाचकामाख्याकुलकामिनी कुलीनाकु·
लवंसवादुर्गादुर्गतिनाशिनी कौमारीकुल
जाकृष्णाकृष्णदेहाकृशोदरी कृशांगीकुलि
शांगीचक्रींकारीकमलाकला करालास्या
करालीचकुलकान्तापराजिता उग्रउग्रप्रभा
दीप्ताविप्रचित्तामहाबला नीलाघननामेघ·
नादामात्रामुद्रामितासिता ब्राह्मीनाराय·
णीभद्रासुभद्राभक्तवत्सला माहेश्वरीचचा
मुण्डावाराहीनारसिंहिका वज्राङ्गीवज्रकं
कान्तमुण्डस्रविनीशिवा मालिनीनरमुण्डा
लीगलद्रक्तविभूषणा रक्तचन्दनसिक्ताङ्गी
सिन्दूरारुणमस्तका घोररूपाघोरदंष्ट्राघो
राघोरतराशुभा महादंष्ट्रामहामायासुदन्ती
युगदन्तुरा सुलोचनाविरूपाक्षीविशाला
क्षीत्रिलोचना शारदेन्दुप्रसन्नास्यास्फुरत्
स्मेरांबुजेक्षणा अट्टहासाप्रफुल्लास्यास्मेर
वक्त्रासुभाषिणी प्रफुल्लपद्मवदनास्मिता
स्याप्रियभाषिणी कोटराक्षीकुलश्रेष्ठाम
हतीवक्रुभाषिणी सुमतिःकुमतिश्चण्डा
चण्डमुण्डातिवेगिनी प्रचण्डाचण्डिकाच

णी वह्निनाचा चण्डवेगिनी सुकेशी मुक्तकेशी
च दीर्घकेशी महाकचा प्रेतदेहकर्णपूरा प्रेत
पाणिसुमेखला प्रेतासना प्रियप्रेता प्रेतभू
मिकृतालया श्मशानवासिनी पुण्या पुण्य
दा कुलपण्डिता पुण्यालया पुण्यदेहा पुण्य
श्लोका च पावनी पूता पवित्रा परमा परा पुण्य
विभूषणा पुण्यनाम्नी भीतिहरा वरदा ख
ड्गपाशिनी नृमुण्डहस्ता शस्ता च छिन्नम
स्ता सुनासिका दक्षिणा श्यामला श्यामा शा
न्ता पीनोन्नतस्तनी दिगम्बरी घोररावा सृक्का
न्तरक्तवाहिनी घोररावा शिवा संगा निःसं
गा मदनातुरा मत्ता प्रमत्ता मदना सुधासिन्धु
निवासिनी अतिमत्ता महामत्ता सर्वाकर्षण
कारिणी गीतप्रिया वाद्यरता प्रेतनृत्यपराय
णा चतुर्भुजा दशभुजा अष्टादशभुजा तथा
कात्यायनी जगन्माता जगती परमेश्वरी
जगद्बन्धुर्जगद्धात्री जगदानन्दकारिणी
जगज्जीववती हैमवती माया महालया ना
गयज्ञोपवीताङ्गी नागिनी नागशायिनी ना
गकन्या देवकन्या गान्धारी किन्नरेश्वरी मो

श्या। ऽरात्री महारात्री दारुणाभा सुरासुरी विद्या
१। धरी वसुमती यक्षिणी योगिनी जरा राक्षसी
७०। डाकिनी वेदमयी वेदविभूषणा श्रुतिः स्मृ
तिर्महाविद्या गुह्यविद्या पुरातनी चिन्ताचि
न्त्या स्वधा स्वाहा निद्रा तन्द्रा च पार्वती अपर्णा
निश्चला लोला सर्वविद्या तपस्विनी गंगा का
शी शची सीता सती सत्यपरायणा नीतिः सु
नीतिः सुरुचिस्तुष्टिः पुष्टिर्धृतिः क्षमा वा
णी बुद्धिर्महालक्ष्मी लक्ष्मी नीलसरस्वती स्रो
तस्वती स्रोतवती मातंगी विजया जया व
दी सिन्धुः सर्वमयी तारा शून्यनिवासिनी
शुद्धा तरंगिणी मेधा लाकिनी बहुरूपिणी
सदानन्दमयी सत्या सर्वानन्दस्वरूपिणी
सुनन्दा नन्दिनी स्तुत्या स्तवनीया स्वभाविनी
रंकिणी टंकिणी चित्रा विचित्रा वि३रूपिणी
पद्मा पद्मालया पद्ममुखी पद्मविभूषणा शा
किनी हाकिनी क्षान्ता राकिनी रुधिरप्रिया
भ्रान्तिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी उ
पेन्द्राणी महेशानी ज्योत्स्ना चेन्द्रस्वरूपिणी
सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमा

न शक्तिः सूक्तिर्मतिमती भुक्तिर्मुक्तिः प्रतिव
ना सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा
सर्वज्ञा सिद्धिदा सिद्धा भव्या भाव्या भयापहा
कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया त
मिस्रा यामिनी स्थावस्थिरा धीरा तपस्विनी
चार्वङ्गी चञ्चला लोलजिह्वा चारुचरित्रिणी
त्रपा त्रपावती लज्जा निर्लज्जा ह्रीं रजोवती स
त्त्ववती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी ग
रिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा भी
मा भयानका भीमनादिनी भीः प्रभावती
वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया
ऋक्सामाथर्वनिलया रागिणी शोभना स्व
रा कलकण्ठी कम्बुकण्ठी वेणुवीणापरायणा
वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी
मधुमती कुण्डलिनी ऋद्धिः सिद्धिः शुचिस्मि
ता रम्भोर्वशी रती रामा रोहिणी रेवती रमा
शङ्खिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणि
नी पिनाकधारिणी धूम्रा शरभी वनमालि
नी रथिनी समरप्रीता वेगिनी रणपण्डिता

पुरा॰
र॰
७८

नटिनी विंविनी नीलालावण्यांबुधिचन्द्रिका
वलिप्रिया सदापूज्या पूर्णा दैत्येन्द्रमाथिनी म
हिषासुरसंहर्त्री वासिनी रक्तदन्तिका रक्तपा
रुधिराक्ताङ्गी रक्तखर्परहस्तिनी रक्तप्रिया
मांसरुचिरासवाशक्तमानसा गलच्छोणि
तमुण्डालीकण्ठमालाविभूषणा शवासना
चितान्तस्था माहेशी वृषवाहिनी व्याघ्रत्वंव
राचीनचेलिनी सिंहवाहिनी वामदेवीम
हादेवी गौरी सर्वज्ञभाविनी वालिकातरु॰
णी वृद्धा वृद्धमाता जरातुरा सुभ्रुविलासि
नी ब्रह्मवादिनी ब्राह्मणी मही स्वप्नावती वि
त्रलेखा लोपामुद्रा सुरेश्वरी अमोघारुन्ध॰
ती तीक्ष्णा भोगवसनुवादिनी मन्दाकिनी
मन्दहासा ज्वालामुखेऽसुरान्तका मानदा
मानिनी मान्या माननीया मदोद्धता मदिरा
मदिरोन्मादा मेध्या नव्या प्रसादिनी सुम
ध्यानन्तगामिनी सर्वलोकोत्तमोत्तमा जय
दा जित्वरा जेत्री जयश्रीर्जयशालिनी सुख
दा शुभदा सत्या सभासंक्षोभकारिणी शिव
दूती भूतिमती विभूतिर्भीषणानना कौ॰

मारीकुलज्ञाकुलज्ञीकुलस्त्रीकुलपालिका
कीर्तिर्यशस्विनीभूषाभूष्याभूतपतिप्रिया
सगुणानिर्गुणाधृष्टानिष्ठाकाष्ठाप्रतिष्ठिता
धनिष्ठाधनदाधन्यावसुधासुप्रकाशिनी
उर्वीगुर्वीगुरुश्रेष्ठासगुणात्रिगुणात्मिका
महाकुलीनानिष्कामासकामाकामजीवना
कामदेवकलारामाभिरामाशिवनर्तकी चि
न्तामणिकल्पलताजाग्रतीदीनवत्सला
कार्त्तिकीकीर्त्तिकीकृत्याअयोध्याविषमासम
सा सुमन्त्रामन्त्रिणीघूर्णीह्लादिनीक्लेशना
शिनी त्रैलोक्यजननीहृष्टानिर्मांसामनो
रूपिणी तडागनिम्नजठराशुष्कमांसास्थि
मालिनी अवन्तीमथुरामायात्रैलोक्यपाव
नीश्वरी व्यक्ताव्यक्तानेकमूर्त्तिःशर्वरीभीम
नादिनी क्षेमंकरीशंकरीचसर्वसंमोहका
रिणी ऊर्द्ध्वतेजस्विनीक्लिन्नामहातेजस्विनी
तथ्या श्रेष्ठाभोगिनीपुण्यवतीसर्वमंगला
सर्वप्रियंकरीभोग्याधरणीपिशिताशना
भयंकरीपापहरानिष्कलंकावशंकरी आ
शातृष्णाचन्द्रकलानिद्रामावायुवेगिनी स

श्या॰
१॰
७२
72

सहस्रसूर्य्यसंकाशा चन्द्रकोटीसमप्रभा व
ह्निमण्डलसंस्थाच सर्वतत्वप्रतिष्ठिता सर्वा
चारवतीसर्वदेवकन्याधिदेवता दक्षकन्या
दक्षयज्ञनाशिनी दुर्गतारिका इज्या पूज्या
विभीर्भूतिः सत्कीर्तिर्ब्रह्मरूपिणी रंभोरु
श्चतुराराकाजयंती करुणा कुहूः मनस्वि
नी देवमाता यशस्या ब्रह्मचारिणी ऋद्धि
दा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी आधा
ररूपिणी ध्येया मूलाधारनिवासिनी आ
ज्ञा प्रज्ञा पूर्णमना चन्द्रमुख्यनुकूलिनी
वावदूका निम्ननाभिः सत्या सन्ध्या दृढव्रता
आन्वीक्षिकी दण्डनीतिस्त्रयी त्रिदिवसुन्दरी
ज्वलिनी ज्वालिनी शैलतनया विन्ध्यवासिनी
अमेयाखेचरी धैर्या तुरीया विमलातुरा
प्रगल्भा वारुणी छाया शशिनी विस्फुलिं
गिनी भुक्तिः सिद्धिः सदाप्राप्तिः प्राकाम्या म
हिमाणिमा इच्छासिद्धिर्विसिद्धा च वशित्वो
र्ध्वनिवासिनी लघिमा चैव गायत्री सावित्री
भुवनेश्वरी मनोहरा चिता दिव्या देव्युदारा म
नोरमा पिंगला कपिला जिह्वा रसज्ञा रसि

कारूपा सुखस्वरूपा भोगवती गान्धारी नर
कान्तका पांचाली रुक्मिणी राधा राध्या
भीमा धिराधिका अमृता तुलसी हृल्लाके
टभी कपर्देश्वरी उग्रचण्डेश्वरी वीराजन
नी वीरसुन्दरी उग्रतारा यशोदाख्या देवा
की देवमानिता निरंजना चित्रदेवी क्रोधि
नी कुलदीपिका कुलवागीश्वरी वाणी
मातृका द्राविणी द्रवा योगेश्वरी महामा
री भ्रामरी विन्दुरूपिणी दूती प्राणेश्वरी गु
प्ता बहुला चामरी प्रभा कुब्जिका ज्ञानिनी
ज्येष्ठा भुशुण्डी प्रकटा तिथिः द्राविणी गोप
नी माया कामबीजेश्वरी क्रिया शांभवी
केकरा मेना मूषला स्त्रान्तिलोत्तमा अमे
यविक्रमा क्रूरा सुपत्रशाला त्रिलोचना
सुस्थीःऽसवह्ना प्रीति रम्भा धूम्रार्चि रंगदा
तपिनी तापिनी विश्वा भोगदा धारिणी धरा
त्रिखण्डा बोधिनी वश्या सकला शब्दरूपिणी
बीजरूपा महामुद्रा योगिनी योनिरूपिणी
अनंगकुसुमानंगमेखलानंगरूपिणी व
ज्रेश्वरी वज्रयिनी सर्वद्वन्द्वक्षयंकरी ७८

श्या॰
२॰
७३

गधुवर्तीयोगधुक्ताज्वालांधुमालिनी दुरा
शयाद्धराधाराद्धर्षयाधुरीरूपिणी दुरंताद्धा
क्रांतिहराद्धर्षयाद्धरतिक्रमा देसस्वरीत्रि
कोणस्थाशांकमर्ध्यतुरूपिनी त्रिकोण
निलयानित्यापरमामृतरंजिता महाविद्या
स्वरीश्वेतामेरुण्डाकुलसुन्दरी त्वरिताभ
क्तिसंशक्ताभक्तवश्यासनातनी भक्तानंद
मयीभक्तभाविकाभक्तशंकरी सर्वसौन्द
र्यनिलयासर्वसौभाग्यशालिनी सर्वसंभो
गभवनासर्वसौख्यनिरूपिणी कुमारीपूज
नरताकुमारीव्रतचारिणी कुमारीभक्तिसु
खिनीकुमारीरूपधारिणी कुमारीपूजक
प्रीताकुमारीप्रीतिदाप्रिया कुमारीसेवका
संगाकुमारीसेवकालया आनन्दभैरवीबा
लाभैरवीवटुभैरवी श्मशानभैरवीकालभै
रवीपुरभैरवी महाभैरवपत्नीचपरमानन्द
भैरवी सुधानन्दभैरवीचउन्मादानन्दभैर
वी मुक्तानन्दभैरवीचतथातरुणभैरवी
ज्ञानानन्दभैरवीचअमृतानन्दभैरवी म
हाभयंकरीतीव्रातीव्रवेगातपस्विनी त्रि

पुराधरमेशानी सुन्दरीपुरसुन्दरी त्रिपुरेशी
पंचदशी पंचमी पुरवासिनी महासप्तदशी ।
चैव षोडशी त्रिपुरेश्वरी महांकुशस्वरूपा च
महाचक्रेश्वरी तथा नवचक्रेश्वरी चक्रेश्वरी
त्रिपुरमालिनी राजराजेश्वरी धीरा महात्रि।
पुरसुन्दरी सिन्दूरपूररुचिका श्रीमत्त्रिपुर
सुन्दरी सर्वांगसुन्दरी रक्तारक्तवस्त्रोत्तरी
यणी जवाजावकसिन्दूररक्तचन्दनधारि
णी यवायावकसिन्दूररक्तचन्दनरूपधृक्
चामरीबालकुटिलनिर्मलश्यामकेशिनी
वज्रमौक्तिकरत्नाढ्यकिरीटमुकुटोज्ज्वला
रत्नकुण्डलसंसक्तस्फुरद्गण्डमनोरमा कुं।
जरेश्वरकुंभोत्थमुक्तारंजितनासिका मु।
क्ताविद्रुममाणिक्यहाराढ्यस्तनमण्डला
सूर्यकान्तेन्दुकान्ताढ्यस्पर्शाश्मकण्ठभूष
णा बीजपूरस्फुरद्बीजदन्तपंक्तिरनुत्तमा
कामकोदण्डकाभुग्नभ्रूकटाक्षप्रवर्षिणी
मातंगकुंभवक्षोजा लसत्कोकनदेक्षणा
मनोज्ञशष्कुलीकर्णा हंसीगतिविडंबिनी
पद्मरागांगदज्योतिर्दोश्चतुष्कप्रकाशिनी

भुवा
१०
७४

नानामणिपरिष्कृतोच्चकुचकंचनकंकना
नागेन्द्रदन्तनिर्म्माणवलयांकितपाणिनी श्रं
गुलीयकचित्रांगी विचित्रक्षुद्रघंटिका पट्टां
बरपरीधानाकुलमंजीरशिंजिनी कर्पूरा
गुरुकस्तूरीकुंकुमद्रवलेपिता विचित्ररत्न
पृथिवीकल्पशाखितलस्थिता रत्नद्वीपस्फु
रद्रक्तसिंहासनविलासिनी षट्चक्रभेदनक
रीपरमानन्दरूपिणी सहस्रदलपद्मान्तश्च
न्द्रमण्डलवर्त्तिनी ब्रह्मरूपशिवक्रोडनानास
खविलासिनी हरविष्णुविरिंचीन्द्रग्रहनायः
कसेविता शिवाशिवाचरुद्राणीतथैवशि
ववादिनी मातंगिनीश्रीमतीचतथैवानन्द
मेखला डाकिनीयोगिनीचैवतथोपयोगि
नीमता माहेश्वरीवैष्णवीचभ्रामरीशिवरू
पिणी अलंबुषावेगवतीक्रोधरूपासमेखा
ला गांधारीहस्तिजिह्वाचईश्वरीचैवशुभंकरी
पिंगलाब्रह्मदूतीचसुषुम्नाचैवगान्धिनी
आत्मयोनिर्ब्रह्मयोनिर्जगद्योनिरयोनिजा
भगरूपाभगस्थात्रीभगिनीभगरूपिणी भ
गात्मिकाभगाधारूपिणीभगमालिनी

लिंगाङ्कैचैवलिंगाङ्गीत्रिपुराभैरवीतथा
लिंगगीतिः सुगीतिश्च लिंगस्था लिंगरूपधृ
क् लिंगाभिधायिनी लिंगप्रिया लिंगनिवा।
सिनी लिंगस्था लिंगिनी लिंगरूपिणी लिंग
सुन्दरी लिंगगीतिर्महाप्रीता भगगीतिर्म
हाकुला लिंगनामसदानन्दा भगनामस
दागतिः भगनामसदानन्दा लिंगनामसदा
गतिः लिंगमालाकंठभूषा भगमालाविभू
षणा भगलिंगामृतप्रीता भगलिंगामृतस्वरूपा
वभगलिंगामृतावहा स्वयंभूकुसुमप्रीता
स्वयंभूकुसुमार्चिता स्वयंभूकुसुमप्राणा
स्वयंभूकुसुमोत्थिता स्वयंभूकुसुमस्नाता
स्वयंभूपुष्पतर्पिता स्वयंभूपुष्पघटिता स्वयं
भूपुष्पधारिणी स्वयंभूपुष्पतिलका स्वयं
भूपुष्पचर्चिता स्वयंभूपुष्पनिरता स्वयंभू
कुसुमग्रहा स्वयंभूपुष्पयज्ञांशा स्वयंभूकु
सुमात्मिका स्वयंभूपुष्पनिचिता स्वयंभूकु
सुमप्रिया स्वयंभूकुसुमादानलालसोन्म
त्तमानसा स्वयंभूकुसुमानन्दलहरीस्निग्ध
देहिनी स्वयंभूकुसुमाधारा स्वयंभूकुसुमा।

पुपा॰
२॰
७५

कुला स्वयंभूपुष्पनिलया स्वयंभूपुष्पवासिनी
स्वयंभूकुसुमाह्लाद्या स्वयंभूकुसुमात्मिका स्व
यंभूपुष्पकारिणी स्वयंभूपुष्पपाणिका स्वयं
भूकुसुमध्याना स्वयंभूकुसुमप्रभा स्वयंभू
कुसुमज्ञाना स्वयंभूपुष्पभोगिनी स्वयंभूकु
सुमोल्लासा स्वयंभूपुष्पवर्षिणी स्वयंभूकु
सुमोत्साहा स्वयंभूपुष्परूपिणी स्वयंभूकु
सुमोन्मादा स्वयंभूपुष्पसुन्दरी स्वयंभूकु
सुमाराध्या स्वयंभूकुसुमोद्भवा स्वयंभूकुसु
मव्यग्रा स्वयंभूपुष्पपूर्णिता स्वयंभूपूजक॰
प्रज्ञा स्वयंभूहोतृमातृका स्वयंभूदातृरक्षि
त्री स्वयंभूरक्ततारिका स्वयंभूपूजकग्रस्ता स्व
यंभूपूजकप्रिया स्वयंभूवन्दकाधारा स्वयं
भूनिन्दकान्तका स्वयंभूप्रदसर्वस्वा स्वयंभूप्र
दपुत्रिणी स्वयंभूप्रदसस्मेरा स्वयंभूप्रदशरी
रिणी सर्वकालोद्भवप्रीता सर्वकालोद्भवात्
मिका सर्वकालोद्भवोद्भावा सर्वकालोद्भवो
द्भवा कुण्डपुष्पसदाप्रीतिर्गोलपुष्पसदारतिः
कुण्डगोलोद्भवप्राणा कुण्डगोलोद्भवात्मिका
स्वयंभुवाशिवाधात्रीपावनालोकपाविनी

कीर्तिर्यशस्विनी मेधा विमेधा शुक्रसुन्दरी श्र
ष्ठिनी कृत्तिका शुष्का तेजस्का चन्द्रमण्डला
सूक्ष्मा सूक्ष्मा बला काच वरदाभयनाशिनी
वरदाभयदा चैव मुक्तिबन्धविनाशिनी का
मुका कामदा कान्ता कामाख्या कुलसुन्दरी
दुःखदा सुखदा मोक्षा मोक्षदार्थप्रकाशिनी
दुष्टा दुष्टमतिश्चैव सर्वकार्यविनाशिनी
शुक्राधारा शुक्ररूपा शुक्रसिन्धुनिवासिनी
शुक्रालया शुक्रभोगा शुक्रपूजा सदारतिः
शुक्रपूज्या शुक्रहोमसन्तुष्टा शुक्रवत्सला
शुक्रमूर्तिः शुक्रदेहा शुक्रपूजकपुत्रिणी शु
क्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुन्दरी
शुक्रस्नाता शुक्रकरी शुक्रसेव्याति शुक्रिणी
महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी
शुक्राभिधेया शुक्रार्हा शुक्रवन्दकवन्दिता
शुक्रानन्दकरी शुक्रसदानन्दाभिधायिका
शुक्रोत्सवा सदा शुक्रपूर्णा शुक्रमनोरमा शु
क्रपूजकसर्वस्वा शुक्रनिन्दकनाशिनी शु
क्रात्मिका शुक्रसंपत् शुक्राकर्षणकारिणी
शारदा साधकप्राणा साधकासक्तमानसा सा

पृपा॰
२॰
७८
76

यकोनमसर्वस्वासाधकाभक्तरक्षणा साध्यै
कानन्दसन्तोषासाधकानन्दकारिणी आ
त्मविद्याब्रह्मविद्यापरंब्रह्मस्वरूपिणी त्रिकू
टस्थापंचकूटासर्वकूटशरीरिणी सर्ववर्ण
मयीवर्णजपमालाविधायिनी श्रीशिवउवा
च इति श्रीकालिकानामसहस्रंशिवभाषितं
गुह्याद्गुह्यतरंसाक्षान्महापातकनाशनं पूजा
कालेनिशीथेचसन्ध्ययोरुभयोरपि लभते
गाणपत्यंसयःपठेत्साधकोत्तमः यःपठेत्सा
धकश्रेष्ठापिश्रृणोतिश्रावयेदथ सर्वपापविनि
र्मुक्तःसयातिकालिकापुरं श्रद्धयाश्रद्धया
वापियःकश्चिन्मानवःस्मरेत् दुर्गंदुर्गशतं
तीर्त्वासयातिपरमांगतिं वन्ध्यावाकाकवं
ध्यावामृतवत्साचयाङ्गना श्रुत्वास्तोत्रमि
दंपुत्रान्लभतेचिरजीविनः यंयंकामयते
कामंपठन्स्तोत्रमनुत्तमं देवीपादप्रसादेन
तत्तदाप्नोतिनिश्चितं स्वयम्भूकुसुमैःशुक्लैः
सुगन्धिकुसुमान्वितैः नवायांवकसिन्दूर
क्तचन्दनसंयुतैः मत्स्यमांसादिभिर्योगेम
धुभिःसाज्यपायसैः भक्त्योपनीतैर्मन्त्रेणयो

यितैः सहस्रं पंचभिः पंचोपचारैर्नैवेद्यैर्बलिभि
र्बकुशोणितैः धूपदीपैर्महादेवीं पूजयित्वा
मनोहरैः जप्त्वा महामनुं स्तोत्रं पठेद्भक्तिसम
न्वितः अनन्यचेताः स्थिरधीर्मुक्तकेशो दिग
म्बरः शवारूढस्थितोऽथवा श्मशानालयमाग
तः शून्यालयगतो वापि शय्यास्थो वा शिवात्म
कः स भवेत्कालिकापुत्र इति ख्यातिमुपागतः
सर्वविद्यावतां श्रेष्ठो धनेन च धनाधिपः वा
युतुल्यबलो लोके दुर्जयः शत्रुमर्दनः सा
वेशं कष्टसंतीर्णः सर्वसिद्धिसमन्वितः मयु
मस्तास्वयं देव्या सेव्यमानः सुरोपमः महेश
रवद्योगीन्द्रः सर्वसत्वपुरस्कृतः कामिनी
कामरूपो सौमवीकर्षणकारकः जलस्त
म्भोग्निवायूनां स्तम्भको राजवल्लभः यशस्वी
सत्कविर्धीमान्स्त्रनम्रश्रीकोकिलस्वरः वक्र
त्रश्रीगजाश्वानामीश्वरो धार्मिकः कृती मा
र्कण्डेयवदायुष्मान् जरापलितवर्जितः न
वयौवनयुक्तः स्यादपि वर्षसहस्रभाक् बहु
किं कथ्यते तस्य पठतः स्तोत्रमुत्तमं न किंचि
द्दुर्लभं लोके यद्यन्मनसि वर्त्तते बालसहस्रम

श्या
१०
२

गणानं त्रैलोक्यस्त्रौगगनागमः सर्वमाशुभवेन्मे·
वश्तवस्यास्यप्रसादतः रजस्वलामंगोपपपपन
जप्त्वाकालीमहामंत्रं स्तवेनानेनसंस्तसस्सा
यकः किंनसाधयेत् परदारपरोवापिजप्त्वा
मंत्रपठनात्तवं कुबेरस्ववित्ताढ्यो जायतेसा·
यकोत्तमः अष्टोत्तरशतंजप्त्वाघोनिमासंमन्त्र
त्त्ववित् संगस्यपठनादस्यसर्वविघ्नहरोभवे
त् दिगंबरोमुक्तकेशः प्राध्यास्थ्यामेथुनीनरः
जप्त्वास्तवामहाकालीं खेचरोजायतेः चिरा
त् मुक्तोत्सारणकालेचजपपूजापरायणः
श्मशानकालिकास्तोत्रवाणीवसत्कविर्भ
वेत् आलोकयन्नचिन्तयन्त्वाविवस्त्रांपरयोषि
तां जप्त्वास्तवा महाकाली सर्वपापैः प्रमुच्यते
स्मरतेचमंत्रं जप्त्वास्तवाम भगवंतीप्रियां सर्व
पापैः परित्यक्तोमानवः स्यात्मुक्तोपमः कु
हूश्रोण्योस्संक्रांतिचतुर्दश्यष्टमीषुच नवम्यां
मंगलदिनेपठेत्कोटेऽस्तु साधकः भौमावास्यां
निशीथेचचतुष्पथगतोनरः मासभक्तवलिं
दत्वासदायमाप्नोतिनं अष्टोत्तरशतंजप्त्वा
पठन्नाममहस्तकं सोऽदर्शनोभवेदाशुदेव

गन्धर्वैस्सेवितः यो नेतेन प्रकारेण कालीभक्
तिपरायणः स्तम्भयेदखिलान् लोकान् राज्ञा
नमपि मोहयेत् आकर्षयेद्देवकन्यां वशयेद्
दपि केशवं मारयेदखिलान्दुष्टानुच्चाटयेति
शात्रवान् नरमार्जारमहिषच्छागमूषिक
शोणितैः सास्थिमांसैः समधुभिः सौवीरैः
उपयापयेस्सैः योनिलक्षणतोयेन भगलिंगा
मृतेन च शुक्रैः स्वजाजपानेन कालीमन्त्र
प्रसाधकः सहस्रनामभिर्दिव्यैः स्तौति भक्ति
परायणः मातेव दक्षिणा तस्य सर्वत्र हितका
रिणी परनिन्दापरद्रोहपरदारपरायण खला
यपरं तन्त्राय भ्रष्टाय साधकाय च शिवाभ
क्ताय दुष्टाय ह्रष्टकाय दुरात्मने हरिभक्तिवि
हीनाय परदारपराय च नमस्तं वदर्शयेद्देवि स
न्दर्शयेत् शिवहा भवेत् कुलीनाय महात्मनाय गु
रौभक्तिपराय च वैष्णवाय विष्णुभक्ताय भक्ति
युक्ताय मत्त्रियो श्रेष्ठ तानन्दरूपाय निवेदित
नाय च दद्यात्स्तोत्रं महाकाल्याः साधकाय
शिवाज्ञया गुरुविष्णुमहेशानामभेदेन महे
श्वरि सर्वं मत्रा भावयेत्तं मन्त्री महेशः स्यान्न संश

प्रपा॰
२॰
७८
78

यः सशक्तः शिवभक्तश्च सएव वैष्णवोत्तमः
संपूज्य स्तौति यः कालीं सहैतं भावमावहन्
देव्यानन्देन सानन्दो देवीभक्तेन भक्तिमान्
सएव धन्यो यस्यार्थे महेशो व्यग्रमानसः
कामयित्वा यथाकामं स्तवमेनमुदीरयेत्
सर्वरोगविनिर्मुक्तो जायते मदनोपमः च
क्रं वा स्तवमेनं वा धारयेदंगसंगतं विलिख्य
विधिवत्साधुः सएव कालिकातनुः देव्यै नि
वेदितं यद्यत्तस्यांशं भक्षयेन्नरः दिव्यदेहध
रो भूत्वा देव्याः पार्श्वचरो भवेत् नैवेद्यनिन्द
कं दृष्ट्वा नृत्यन्ति योगिनीगणाः रक्तपानो
द्यताः सर्वे मांसास्थिचर्वणोद्यताः तस्मान्नि
वेदितं देव्यै दृष्ट्वा श्रुत्वा च मानवः न निन्देन्म
नसा वाचा सर्वथापि परांमुखः आत्मानं का
लिकात्मानं भावयन्स्तौति यः शिवां शिवो
पमं गुरुं ध्यात्वा सएव श्रीसदाशिवः यस्या
लयेति इति सूक्तमेतत्स्तोत्रं मया मालिवि
तं विधियत्नैः गोरोचनालक्तककुंकुमाक्तसि
न्दूरकर्पूरमधुद्रवेण न तस्य गेहस्य भयं न
दस्योर्नचाग्नेर्भयोनाशनिवह्निभीतिः उग्रानवा॰

योऽपि नात्र शंकाः लक्ष्मीः स्वयं तत्र वसेद्लो
ला स्तोत्रं पठनेन तदनन्तपुण्यं कालीपदांभो
जपरो मनुष्यः विधानपूजाफलमेव सम्य
क्प्राप्नोति सर्वमनोरथोऽस्मो मुक्ताः श्री
चरणारविन्दविमुखाः स्वर्गस्थितो भोगि
नो ब्रह्मेन्द्रशिवात्मिकाश्च न सर्वलोक
स्थिनो लेभिरे श्रीमत्सद्गुरुभक्तिपूर्वकम
हाकालीपदध्यायिनो भुक्तिमुक्तिस्वयं
स्युतिपरामुक्तिःकरस्थायिनो इति श्रीका
लिकाकुलसर्वस्वे हररामसंवादे कालिका
सहस्रनामस्तोत्रं समाप्तम् ॥
अथ मंत्रसिद्ध्यर्थं पुरश्चरणविधिर्लिख्यते
तदुक्तं कालीतंत्रे आदौ पुरश्क्रियां कुर्वन्नि
यमेन यथाविधि लक्षमेकं जपेद्विद्यां हवि
ष्याशी दिवा शुचिः रात्रौ ताम्बूलपूरास्यः पा
र्याधालङ्कमानतः ततः सिद्धमनुर्मंत्री प्र
योगार्हो न चान्यथा जीवहीनो यथा देही
सर्वकर्मसु न क्षमः पुरश्चरणहीनोऽपि
तथा मंत्रः प्रकाशकः तस्मादादौ पुरश्चर्यां कु
र्यात्साधकसत्तमः नानाचारेण कर्तव्यं नो

पुपा॰
र॰
७९
79

ध्यारणमितस्ततः भूतहिंसानकर्त्तव्यायस्तु
हिंसाविशेषतः बलिदानंविनादेव्याहिंसासर्व
त्रवर्जिता भ्रममंत्रपुरस्कारंनिन्दांचैवविव
र्जयेत् प्रयोगंचततःकुर्य्यात्सर्वमेववदुर्ल
भम् स्वतंत्रेऽपि दिवालक्षंशुचिर्भूत्वाहवि॰
ष्याशीजपेन्नरः ततस्तत्तद्दशांशेनहोमये
द्धविषाप्रिये तीर्थतोयेनपयसामधुनास
र्पिषादिना मधुनावासितामिश्रतोयेनपर
मेश्वरि देवींचाभिषिंचेत्तोयैस्तर्पणंचदशां
शतः तद्दशांशंहविष्यान्नंभोजयेद्भक्तितः
प्रिये कालीमंत्रविदोविद्वान्दक्षिणांगुरवे
ददेत् पाशवंकथितंकल्पंपूर्णश्रेष्ठंवततः॥
प्रिये फेत्कारिणीयेऽपि मत्स्यादिनियमा।
हारःसकृद्भोज्योविधीयते दिवाचैवजपंकु
र्य्याद्भैरवस्मरणीकोद्विजः शाकयावकभ
क्ष्याशीचरुणासहसर्पिषा दध्यामूलफले
र्वापिकुर्य्याद्दर्शनमन्वहं ब्रह्मचर्यंतथैवा
क्रंस्नानंत्रिवसनंनत्यथा रुद्रीरुदेवतायास्तु
पूजांकृत्वाविशेषतः सर्वेमंत्राःप्रयोक्तव्याः
पायसघृतवादिकाः वाराहीतंत्रेच नचात्र

सिद्धिमाप्नोति हीनेन च प्रमाणवान्तरे दृढं याते दृढ
यं च मनसोः नो च न मनो न च वाक्चैव कामः श-
क्तिश्च श्रवणः श्रीश्च कथ्यते तदाद्येष्वं मंत्रेषु प्र
णवं नैव योजयेत् वैष्णवे प्रणवं दद्यात् शैवे श-
क्तिं नियोजयेत् शाक्तो कामं गणेशे वरमा बीज-
मसि स्मरः सूर्ये चैव तदा मैथं तान्नार्योपि विनि-
योजयेत् प्रणवाद्यं गृहस्थानां नान्तवच्चू स्वनिष्क-
लं भवेत् आद्यन्तयोर्ब्रह्मस्थानां यतीनां मह-
तामपि अनस्यचेता आसीनो वाग्यतो विद्वि-
ता शनैः जपन्मूलमंत्राश्च गुरुवन्दनपूर्व-
कं तारा प्रदीपे च कूर्म चक्रस्तु विवीरस्य आस-
नेन त्र कल्पयेत् चैवाजिन कुशोशेषवस्त्र विच-
कं वा लेख्यवा आसनानि प्रकल्प्याद्यं सविशे-
ष्यायको नमः शरवी कुशपादर्भे वा न चर्म्मा-
णि तथाथनः महाशंकोपरिस्थित्वा साय-
येष्ठाप्रयत्नतः अमन्त्रापि देवता गुरुमंत्राण-
मेकं संभावयन् धिया जपेदेकमनाः प्रातः
कालमध्यन्दिनावधि यावत्संख्यासमारब्धं
तत्कर्त्तव्यमवश्यकं यदि स्यान्नाधिकं कुर्यान्न्यू-
न मुक्तो भवेन्नरः स्फुरन्मालाद्यां प्रातःकाल

पुपा॰
१॰
८॰
80

समारभ्य जपेन्मध्यन्दिनावधि प्रथमेऽह्नि
यत्संख्यं तज्जप्तं स्याद्दिने दिने न्यूनाधिकं न जपेदेवं
असमाप्ते सदा जपेत संख्यापूर्णे निजद्रव्ये ज
पसंख्यादशांशतः यथोक्तकुण्डे कुण्डयाद्य
ष्टाविधिसमाहितः अथवा प्रत्यहं जप्त्वा कुण्ड
याद्दशांशतः ततो होमदशांशेन जले संपू
ज्य देवतां तर्पणादिकं कार्यमित्यादि फल
संभवेऽपि स्नातः शुक्लाम्बरधरः शुचिः प्रय
तमानसः दिवा चैव प्रकर्तव्यं सर्वकामार्थ
सिद्धये तारप्रदीपे च विवक्षविधिवद्धिता
न्मण्डलं सुमनोहरं तस्मिन्कलशमारोप्य
क्वाथतोयैः प्रपूरयेत निक्षिप्य नवरत्नानि
तत्र गन्धाष्टकं पुनः आवाह्य पूजयेत्तत्र दे
वीमावरणैः सह कलशाग्रे जपेन्मंत्रं संख्य
याक्षरणावधि ततः पूर्णे समागत्य गुरुर्देवा
विधानतः अभिषिंचेत्शिष्यं मूर्द्धिन कल
शोदकवारिभिः ततः शिष्यः प्रयत्नेन धनाद्यै
स्तोषयेद्गुरुं तस्यैवं विधिना लब्धप्रजप्यात
दशांशहोमं तद्दशांशतर्पणं तद्दशांशा
भिषेकं तद्दशांशब्राह्मणभोजनं कारयेत

नदशांशो होमादिसंख्योक्तिगुणजपो विधे
णकार्यः क्षत्रियाणां त्रिगुणजपः वैश्येना
चतुर्गुणजपः शूद्रेण पंचगुणजपः कार्यः
तदुक्तं कुलप्रकाशे यद्यदंगं विहीयेत तं
संख्याद्विगुणं जपं कुर्वीत विचक्षणः पंचसं
ख्यया साधकोत्तमः अथवापि होमकर्म
ण्यशक्तानां विप्राणां द्विगुणो जपः क्षत्रे
षां च वर्णानां त्रिगुणादिः समीरिताः गुरु
मन्त्राधिपे देवे मन्त्राः सिध्यन्ति मंत्रिणः सगुण
मालाधौ च होमाद्यशक्तो देवेपि कुर्यान्न
द्विगुणं जपं यदि द्विजाद्यशक्तः स्यात्तद्ध्या
भावेन सुन्दरि केवलं जपमात्रेण पुरश्च
र्या विधीयते अथवा ब्राह्मणभोजनम
वश्यमेव तदुक्तं कुलप्रकाशे यकमंग
विहीयेत तं मंत्रसिद्धिमवाप्नुयात् अन्त्रेष्व
नर्थेष्वपि दैवीपदार्थैः षड्रसैरपि संभोजि
तेषु विप्रेषु सर्वं हि सफलं भवेत् सम्यक्
सिद्धैकमंत्रस्य पंचांगोपासनेव हि सर्वमं
त्राश्च सिद्ध्यन्ति तत्प्रसादात्कलेश्वरि अथवा
पि सर्वदा भोजयेद्विप्रान्ससांगत्वसि

पुपा०
२०
८१
81

हृदये विप्राराधनमाचरेणंबंगसांगंभवेत्सदा
तत्रांतरेपि कृत्वामंत्रजपंमंत्रीपुरस्काराय
संयतः दशांशंजुहुयाद्देग्नौयथोक्तविधा
नात्सयः षष्ठाजपचतुर्थांशंस्वाहान्तमूल
मुच्चरन् ततोहोमदशांशंतस्वाहान्ततर्पा
येज्जलैः तर्पणस्यदशांशेननमोन्तमूल
मुच्चरन् अभिषिंचेत्स्वमूर्द्धानंजलैःकुंभा
त्प्रमुद्रया फेत्कारिण्या स्वाहान्तेनवंम
त्रेणकुर्याद्धोमंबलिंतथा मंत्रांतेनामसं
योज्यतर्पयामीतितर्पणं इतिपशुभावकल्प
अथयकवीराकल्पे विशेषोयथा तदुक्तं
कुलचूडामणौ पुरश्चरणकालेपिपर
योषाप्रसूनंच दीप्तिनावसंपुष्पाद्यैर्मी
जैः पायससंभवैः आरंभकालेनियतंस्व
यंपक्वान्नभोजनं नानाविधंपिष्टकंच
नानारससमन्वितं दुग्धंदधियुतंतक्रंन
वनीतंसशर्करं उपलाद्वेणुचूर्णानिचनाना
विधरसायनं नारिकेलंकपित्थंचनागरंग
स्वदर्शनं लिम्पाकंवीजपूरंचदाडिमीफा
लमुत्तमं नागरंगफलंचैवनानागन्धविले

पनं चन्दनं मृगनाभिं च श्रीखण्डं नवपल्लवं
टंकनं लोध्रकं चैव जलजं वनजं तथा नाना
शैलसमुद्भूतं नानालंकारभूषितं शून्यगे-
हे समानीय अर्घ्योदकविभूषितं अमृतीक-
रणं कृत्वा पश्चात्स्वाभिमुखं विन्यसेत् शक्तिर्य-
था तदुक्तं तत्रैव ब्राह्मणी क्षत्रिया वैश्या।
शूद्रा च कुलभूषणा वेश्या नापितकन्या च
रजकी योगिनी तथा विशेषवैदग्ध्ययुताः
सर्वा एव कुलांगनाः अथ दीक्षितामष्टशक्तीः
क्रमेण संस्थाप्य पूर्ववद्यथार्घ्यपात्रादिकं
स्थापयित्वा अर्घ्योदकेन तामभ्युक्ष्यामृत
मंत्रेण धेनुमुद्रयामृतीकृत्याष्टशक्तिरूप
भेदं ज्ञात्वा ब्राह्मण्याद्यष्टशक्तीनां संज्ञाति
नीमकरणं क्रमेण कृत्वा आसनादिकं गन्ध
पुष्पं दद्यात् तदुक्तं तत्रैव अष्टकन्यारूपमे-
दं विलोक्यामर्घ्यवेष्टितं ब्राह्मण्याद्यष्टश-
क्तीनां नामभिः कृतसंज्ञकाः आसनं वसनं ततो
दत्वा स्वागतं च पुनः पुनः अर्घ्यपाद्यं च पानी-
यमधुपर्कं जलं तथा स्नापयेत्कुल्यपुष्पाद्यैः
केशसंस्कारमाचरेत् धूपयित्वा ततः केश-

न्कौशेयं च निवेदयेत् ततः स्नानान्तरे पीठ-
मास्थीर्थ्यपादुकाहयं दत्वा तत्र समासीनां
नानालंकारभूषणैः भूषयित्वानुलेपं च गा
यं माल्यं निवेदयेत् ततस्तां तां शक्तिं पूजा
प्रकरणोक्तक्रमेण ध्यात्वा तासां मूर्ध्नि तत्र।
स्थाप्यपादिमातः समावाह्य जीवन्यासादिकं
गन्धपुष्पधूपदीपान् नानाद्रव्यानुरंजनादि
कं दत्वा तासां सव्यकर्णे क्रमेण स्तोत्रं पठेत्
तदुक्तं तत्रैव तां तां शक्तिं समावाह्य मूर्ध्नि
तासां समानयेत् भाण्डमण्डपमध्ये तु स्व-
र्णपात्रे सुशोभने चर्व्यं चोष्यं लेह्यं पेयं भक्ष्य
भोज्यं निवेदयेत् श्रद्धीदितायास्तास्तत्र त-
तो मायया निवेदयेत् तासां सर्वेषु कर्णेषु त
त्स्तोत्रं समाचरेत् मातर्देवि नमस्ते ऽस्तु ब्र
ह्मरूपधरे ऽनघे कृपया हर विघ्नं मे मंत्रसि
द्धिं प्रयच्छ मे माहेश्वरि वरदे देवि परानन्द।
स्वरूपिणि कृपया हर विघ्नं मे मंत्रसिद्धिं प्र
यच्छ मे कौमारी सर्वविद्येशी कुमारक्रीड
नेपरे कृपयेत्यादि विश्वरूपधरे देवि विन
तास्तत वाहिनि कृपयेत्यादि वाराहि वरदे

देविशक्रादिसुरसंपूजिते कृपयेत्यादि वामे
एतेषु एतेमालासंकलिते विघ्ननाशिनि कृ
पयेत्यादि महालक्ष्मिर्मनहामायेतामसन्ता
पनाशिनी कृपयेत्यादि सितिमातर्मयादे
विमितिमालवहितकृते एकैवहुविधेदेवि
दिव्यरूपेनमोऽस्तु ते एतत्स्तोत्रं पठेद्यस्तु क
र्मारंभेषु संयुतः विघ्नस्तानाशमालोकयत
स्यविघ्नोनजायते कुलीनस्यद्वारदेवाः क
थिताःस्तवपूजक दीक्षाकालेनित्यपूजासम
येनाखिलेयदि तस्यपूजाफलंवक्तव्यंनीय
तेयत्नतोवरः यदिद्वीरापरामात्रंभोजने
तेष्व्हाहृहिः स्थितःस्तोत्रं पठेद्यावत्तावत्तृप्तिः
प्रजायते श्रावस्यषुद्वारवासादितौ हलंच
निवेदयेत ततोदद्यात्तनम्मीलंगाध्यवंन्द
नयाक्ति ते विप्रस्तुप्रदक्षिणीकृत्यवंधमर्घ्यं
स्त्रा भ्रिंसंवेत अत्राद्यदिनगच्छन्तिनिजक
मानिजानुजा अग्रजामातुलानीवामाता
वात्तत्कपत्निका वयसोजातितोवापिहीना
वापरमाकला पूज्याकुलवधूः सर्वैर्निजाहं
कारवर्जितैः सर्वाभावप्रकतराहृजनीया

प्रयत्नतः संस्कृतामसंस्कृतां वापि संपत्तिर्निष्प
त्तिश्रया पूर्वाभावे परा पूज्या महेशयोषिता
यतः एकश्चेत्कुलशास्त्रज्ञः पूजार्हस्तत्र भैर
व सर्वेश्वरादयः पूज्याः समं ब्रह्मशिवादयः
एका चेत्तत्त्ववती तत्र पूजिता चावलोकिता
सर्वाश्चैव परा देव्यः पूजिताः कुलभैरव श्रा
दांवं तेच मध्ये वलत्नपूजौ विशेषतः नपू
जयन्ति चेत्कान्तां नदा विद्वेषैर्विलप्यते पूर्वा
र्जितफलं नास्ति का कथा परजन्मनि तस्मा
त्सर्वप्रयत्नेन यदीच्छेदात्मनो हितं समा
पिकायमन्त्रापशमनं विघ्ननाशने यत्न
तः पूजनीयाः स्युः कुलाकुलजनाः सदा अ
थैतेन क्रमेण लत्नमादौ मध्ये मन्ते चश
क्तीः पूजयेत् ततो रात्रौ प्रथमप्रहरगते मध्य
मे नैवदेवीं संपूज्य रहस्यमानयागं गुरुशिर
सिद्धिदेवीं च ध्यात्वा शिवोऽहमिति भावय
न् जपं कुर्यात् तृतीयप्रहरं यावत् ततोऽक्ष
मालायां गते तु प्रथमे यामे तृतीयप्र
हरावधि निशायां च प्रजप्य सन्ध्यापि शेषेज
पेन्नहि सन्तत्रेपि रात्रौ मासमासं सर्वैर्देवीपूज

पीत्वा विधानतः ततो नग्नां स्त्रियं नग्नो रमन्
क्रेद्दष्टतो ऽपि वा जपेल्लक्षं ततो देवि होमये
ज्ज्वलितानले योनिकुण्डे स्थिते सर्पिर्मांस
मत्स्ययुतं स्मरन् दशांशं तर्पयेन्मद्यैर्मांस
मिश्रैः स्वसाधकः तर्पणस्य दशांशान्तेऽ
भिषिञ्च्य जगन्मयी दशांशं भोजयेत्साधु
साधकं कालिकाप्रिये मद्यमांसं च मत्स्य
चर्व्वणं च प्रदापयेत् ततस्तेतोषयेद्भक्त्या
गुरुं स्वर्णादिभिः प्रिये एतत्कल्पद्वयाद्देवि
मन्त्रैः सिध्यन्ति निश्चितं विनापीत्वा सुरां मु
क्त्वा मांसं गत्वा रजस्वलां योजयेद्दक्षिणां
देवीं तस्य स्युः विपदे पदे कालीतन्त्रेऽपि न
पानस्य विधिं विना येन कार्याणि साधयेत्
तर्पयेच्च पयोभिश्च रक्तया राजते स्तथा म
ज्ञाभिश्च तथा तद्वत्स्वकीयेन कण्ठेन च
श्राकर्षितायाः कन्यायाः कुलप्रक्षालनेन च
मेषमाहिषरक्तेन नररक्तेन चैव हि मूषि
मार्जाररक्तेन तर्पयेत् परदेवतां एवं तर्पण
मात्रेण साक्षात्सिद्धीश्वरो भवेत् कविता जा
यते तस्य शतधारसपर्यया बृहस्पतिसमो

पृपा॰
२॰
८४

84

मृत्वादिविवद्धविमोहने ततस्यपापपुण्यानि
जीवन्मुक्तो भवेद्ध्रुवं उत्तरतंत्रेऽपि योनिरू
पं हि कुंडं वै कृत्वा वितस्तिमात्रतः हस्तवि
स्तारितस्तावत्कृत्वा चापि तथाप्ययः तत्र
कार्य्या हि मंत्रेण अग्निस्थापनिका क्रिया म
हाकालाय देवाय दद्यात् प्रथमाहुतिं प
वमाद्येन मांसेन भक्तेन रुधिरेण च कुल
पुष्पेण सार्द्धेन सरक्तेन विशेषतः आमि
षादिरस्यं वश्मशाने जुहुयात्साधकः कुल
संभवेऽपि रात्रौ नग्नो मुक्तकेशो मैथुने ता
पितस्ततः प्रकर्तव्यं प्रयत्नेन सर्व्वकामा
र्थसिद्धये द्विजानां चैव सर्व्वेषां दिवा विधि
विहीच्यते शूद्राणां च तथा प्रोक्तं रात्रावि
ष्टमहाफलं यद्यत्कामयते कामं तत्तदा
प्नोति निश्चयः कालिकाश्रुतौ च अथ्यहे
नं कालिकामन्त्रजापीयः सदा ब्रह्मात्माज्ञा
नेवैराग्ययुक्तः सोऽभवदीक्षाहरतः शाकेषु
वादिवा ब्रह्मचारी रात्रौ नग्नो मैथुनाशक्त
मानसः जपपूजादिनियमो योषित्सुप्रिय
करः स्वभगोदकेन तर्पणं तेनैव पूजनं सर्व्व

दा कालीरूपमात्मानं विभावयेत् स सर्वयो-
षिदाकर्षको भवति सर्वं हस्तातरते मयदाना-
ति अथ पंचमकारेण सर्वमाप्नोति विद्यां प-
श्ययं नयात्मं सर्ववशं चक्रविं नच नामः परा-
मः पश्याविद्यतेतमोत्ताय ज्ञानाय यथर्म्मायत
स्सर्वं भूतं भव्यं यत्किंचिद्दृश्यादृश्यमानं स्था-
वरं जंगमं तत्सर्वं कालिकातंत्रेत्र नत्प्रोक्तं
वैदेयं श्रुतं मनुजापी सपाप्मानं तरति स ब्र-
ह्मगम्यागमनं तरति स भ्रूणहत्यां तरति स-
द्वेमापं तरति सर्वं हि त्वमाप्नोति सर्वं जाना-
ति सर्वसाक्षी भवति सर्ववेदाध्यायी भवा-
ति स सर्वज्ञापी भवति स सर्वशास्त्रार्थवे-
त्ता भवति सर्वयज्ञाधिकारी भवति आव
कोम्मित्रभूतो भवति इत्याह भगवान् शिवः
निर्विकल्पेन मनसा यः सर्वं करोति अथैवं
पुरश्चारी प्रयोगार्हो भवति अथाद्देशस्थि
शुद्धिर्विलिख्यते अदीक्षितानां गनानां सगान्नि
त्वाश्रुतेः नठ कं भाव चूडामणौ अदीक्षि-
तांगनानां संगात् सिद्धिहानिः प्रजायते तत्क
यां श्रवणेश्रद्धा नत्यागमनं यदि सकृ-

पुया॰
र॰
८५

85

लीनः कथं देवः पूजयेत्परमेश्वरीं श्रीक्रमेऽपि
संशोधनमनावर्थ्य स्त्रीभमर्स्येभसाधकः
कृतेऽपि सिद्धिहानिः स्यात्कुष्ठी भवति चाधि
का तस्मात्शक्तिःशुद्धिः कार्या तदुक्तं कौल
तंत्रे अभिषेकाद्वा वशुद्धिर्मन्त्रस्योच्चारणे
न कृतो रतिकाले महेशानि दीक्षादानेन
कन्यका वनाहायततोप्यर्थादभिषेकं स
माचरेत् स्मरयारेतसावापि जलेन मनुना
थवा संभोगेऽभिषेचेन्नारीं रत्या वामं तत्र व
र्जिता आदौ बालां समुच्चार्य त्रिपुराये स
मुच्चरेत नमः शक्तिं समुच्चार्य इमां कान्तां
ततो वदेत् पवित्रीकुरु शक्तिं ते मम शक्तिं
कुरु प्रिये वह्निजायां समुच्चार्य शुद्धिमंत्र
सुरेश्वरि अनेन मनुना देवि अभिषिक्ताः
स्त्रियः सदा रममाणो भवेन्नित्यं स सर्वसिद्धि
मवाप्नुयात इह लोके परं भोगमन्ते कासि
द्धिमवाप्नुयात् अन्यत्रापि आत्मीयकन्या
कां दिव्यां चाण्डालजां विवर्जितां स्वकान्तां
परकान्तां वा दीक्षितां यौवनान्वितां पूजकः
पूजयेन्नित्यं वामपार्श्वे निवेश्य च स्वीय

कल्पोक्तविधिना न्यासजालं प्रविन्यसेत्
ततो जपेत्त्रियं गच्छन्देवीं त्रिभुवनेश्वरीं
शक्तिविशेषो यथा कुमारीतंत्रे नटीका
पालिनी वेश्या रजकी नापितांगना ब्राह्म
णी शूद्रकन्या च तथा गोपालकन्यका मा
लाकारस्य कन्यापि नवकन्याः प्रकीर्तिताः
एतासु कांचिदानीय तत्स्थाने निमंडले
पूजयित्वा महादेवीं ततो मैथुनमारभेत्
धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम्
स्वाहान्तोयं महामंत्रश्चारंभे परिकीर्तितः
ततो जपेत्त्रियं गच्छन्देवीं त्रिभुवनेश्वरीं
प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचा
धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहं
स्वाहान्तोयं महामंत्रः शुक्रत्यागे प्रकीर्तितः
अथास्य प्रयोगः निशायां शक्तिमेकां
स्ववामभागे समानीय तत्स्थाने स्वका
ल्पोक्तन्यासान्विधाय अदीक्षिता चेत्तदा
पूर्वोक्ताभिषेकमंत्रेण तीर्थादिनाभिषे
कं कृत्वा तस्याः कर्णेऽभेदबुद्ध्या मंत्रमुपदि

पूजा॰
र॰
८९

येदिति शाक्तिशुद्धिः ततो मकारपंचमेन दे
वीं संपूज्य मूलान्ते धर्म्माधर्म्मेत्यादि पठन् मा
तृपीठे पितृभुवि दत्त्वा जपं कुर्य्यात् ततो मू
लान्ते प्रकाशाकाशेत्यादि पठन् आत्मशुक्रं जे
त्रे अथवा मातृपीठे पितृभुवि दत्त्वा जपं कु
र्य्यात् सावरणान्देवीं ध्यात्वा शिवोऽहम्
मिति भावयन् उभयोः संगमं कृत्वा एवं
वन्दनादिकं कुर्य्यादित्यपरप्रकारः इति
पूजामारहस्ये पंचमपरिच्छेदः ५ अथ मं
त्रभेदाः निरूप्यन्ते तदुक्तं सिद्धेश्वरतंत्रे अ
थवक्ष्यामि ते देवी कालिकामंत्रवरं येनैं
याऽज्ञानमात्रेण साधको मोक्षमाप्नुयात् मोहमवा
प्नुयात् मूकोऽपि कविता मेमिथने नच
पनर्थिपः रत्नेनपवनः साक्षात् रूपेण
चमनोहरः मंत्रोद्धारं प्रवक्ष्यामि मंत्रराजं कु
लत्रं प्रिये सौभादि वह्निमारूढं वामः
नेत्रेण संयुतं चन्द्रार्द्धविन्दुनामूर्द्धिनाभू
षितं परमेश्वरि सान्ताद्विवामनेत्रस्थं व
ह्निचन्द्रसमन्वितं बीजं रत्नमिदं प्रोक्तं सा
क्षात्कल्पद्रुमं प्रिये मादनेचन्द्रबीजस्थं भू

शाक्तं संहर्तसिद्धिदं मनुं अस्यैवाशेषमाहात्म्यं
वक्तुं नाहं महेश्वरि तथापि कथ्यते देवि संक्षेपाद्
अस्य यत्फलं मोक्षार्थी लभते मोक्षं केवल्यं परमं
पदं देवीरूपं जगत्सर्वं दृश्यं तत्र विवर्जयेत् अ
थ मन्त्रान्तरं तत्रैव तन्त्रे मन्त्रान्तरं प्रवक्ष्यामि
श्रृणु पार्वति सादरं यस्याराधनमात्रेण सर्व
सिद्धीश्वरो भवेत् अप्रकाश्यं परं गुह्यं न देयं य
स्य कस्यचित् न कुत्रापि समाख्यातं तव स्नेहा
दिहोच्यते पूर्वोक्तमन्त्रराजस्याशेषवर्णेर्द्वयं पि
